
शिक्षा का अधिकार

# संस्कृत-पीयूषम्

7




शिक्षा का अधिकार
संस्कृत-पीयूषम्
7

# संस्कृत पीयूषम् कक्षा ७

# वन्दना

CQGPHJ



जय जय हे भगवति सुरभारति!

तव चरणौ प्रणमामः ।

नादतत्त्वमयि ! जय वागीश्वरि!

शरणं ते गच्छामः ।। 1 ।।

त्वमसि शरण्या त्रिभुवनधन्या

सुरमुनिवन्दितचरणा।

नवरसमधुरा कवितामुखरा

स्मितरुचिरुचिराभरणा ।। 2 ।। जय जय............।

आसीना भव मानसहंसे

कुन्दतुहिनशशिधवले!

हर जडतां कुरु बुद्धिविकासं

सितपङ्कजरुचिविमले! ।।3 ।। जय जय............।

ललितकलामयि ज्ञानविभामयि

वीणापुस्तकधारिणि!

मतिरास्तां नो तव पदकमले

अयि कुण्ठाविषहारिणि ! ।। 4 ।। जय जय............।

**शब्दार्थ**

सुरभारति = हे देववाणी, सरस्वती देवी ! नाद-तत्त्वमयि = नादब्रह्मस्वरूप वाली। शरण्या = शरण देने वाली। नवरसमधुरा = शृङ्गारादि नवरसों से मनोहर । मुखरा = गुंजायमान। स्मितम् = मुस्कान। रुचिः = कान्ति। रुचिराभरणा = सुन्दर आभूषणों से युक्त। आसीना =विराजमान। कुन्दः = कुन्द फूल। तुहिनम् = बर्फ। सितम् = सफेद। विभामयि = प्रकाशस्वरूपा। नः = हमारी। अयि = हे। कुण्ठाविषहारिणि = कुण्ठारूपी विष को दूर करने वाली।

**अन्वयः**

जय जय हे भगवति सुरभारति! तव चरणौ प्रणमामः। हे नादतत्त्वमयि! वागीश्वरि! ते शरणं गच्छामः।। 1 ।।

त्वं शरण्या त्रिभुवनधन्या सुरमुनिवन्दितचरणा नवरसमधुरा कवितामुखरा स्मितरुचिरुचिराभरणा असि।। 2 ।। जय जय............

हे कुन्दतुहिनशशिधवले! सितपङ्कजरुचिविमले! मानसहंसे आसीना भव, जडतां हर, बुद्धिविकासं कुरु ।।3 ।। जय जय............

हे ललितकलामयि ज्ञानविभामयि वीणापुस्तकधारिणि! कुण्ठाविषहारिणि ! तव पदकमले नो मतिः आस्ताम् ।। 4 ।। जय जय हे भगवति सुरभारति ! तव चरणौ प्रणमामः ।

**शिक्षण-सङ्केतः**

**(क) वन्दनापद्यानां समूहगानं कारयत।**

या कुन्देन्दु-तुषार-हार-धवला या शुभ्र-वस्त्रावृता,

या वीणा-वरदण्डमण्डितकरा-या श्वेत पद्मासना।

या ब्रह्माच्युत-शङ्.कर-प्रभृतिभिर्देवैः सदा-वन्दिता,

सा मां पातु सरस्वती भगवती निःशेषजाड्यापहा।।

शुक्लां-ब्रह्म-विचार-सार-परमामाद्यां जगद्व्यपिनीम्,

वीणा-पुस्तक-धारिणीमभयदां जाड्यान्धकारापहाम्।


हस्ते स्फटिकमालिकां च दधतीं पद्मासने संस्थितां

वन्दे तां परमेश्वरीं भगवतीं बुद्धिप्रदां शारदाम्।।

## प्रथमः पाठः

# पुनरावलोकनम्


CQQKJ7



मुनिः आश्रमे निवसति।




मुनी आश्रमे निवसतः।




मुनयः आश्रमे निवसन्ति।


गुरुः शिष्यान् पाठयति। गुरूः कुट्यां निवसतः। गुरवः योगाभ्यासं कुर्वन्ति।



पिताफलं ददाति।



पितरौ फलानि दत्तः।



पितरः फलानिददति।



नदी प्रवहति।




नद्यौ प्रवहतः।



नद्यः प्रवहन्ति।



धेनुः पश्यति।



धेनू पश्यतः।



धेनवः क्षेत्रे चरन्ति



माता जलम् आनयति।



मातरौ जलम् आनयतः।



मातरः जलम् आनयन्ति।

**नपुंसकलिङ्गम्**



दधि पात्रे अस्ति।



दधिनी पात्रयोः स्तः।



दधीनि पात्रेषु सन्ति।

**शब्दार्थः**

निवसति = निवास करते हैं। पाठयति = पढ़ाते हैं। कुर्वन्ति = करते हैं। वेदाभ्यासम्= वेदों का अभ्यास। धेनुः = गाय। गोष्ठे = गोशाला में। मधुकोषेषु = मधुमक्खियों के छत्तों में। परिणमति = रूपान्तरित होता है, परिवर्तित होता है। पात्रयोः = दो पात्रों में।

**अभ्यासः**

**1. उच्चारणं कुरुत पुस्तिकायां च लिखत-**

निवसन्ति शिष्यान् कुट्यां योगाभ्यासं

नद्यौ प्रवहतः धेनू आनयन्ति

**2. एक पदेन उत्तरत -**

(क) फलं कः ददाति ? (ख) वस्त्राणि के ददति ?

(ग) मुनयः कुत्र निवसन्ति ? (घ) शिष्यान् कः पाठयति ?

(ङ) माता का आनयति ? (च) गोष्ठे काः निवसन्ति ?

(छ) दधि कुत्र अस्ति ? (ज) मधूनि कुत्र सन्ति ?

मधु पुष्पेषु भवति। मधुनी पात्रयोः स्तः। मधूनि मधुकोषेषु सन्ति।

जलम्, कुट्यां, गोष्ठे, नद्यौ, पात्रयोः, आश्रमे।

**3. शब्दरूपाणि लिखत -**

शब्दः विभक्तिः एकवचनम् द्विवचनम् बहुवचनम्

पितृ प्रथमा .................. ................. ..................

मातृ प्रथमा .................. ................. ..................

मुनि प्रथमा .................. ................. ..................

**4. म×जूषातः पदानि चित्वा वाक्यानि पूरयत -**

(क) धेनवः ............. निवसन्ति।

(ख) माता ............. आनयति।

(ग) ......................................... प्रवहतः।

(घ) दधिनी............. स्तः।

(ङ) मुनयः................. निवसन्ति। (च) गुरुः ................निवसतः।

**5. उचित-क्रियापदं चित्वा वाक्यं शुद्धं कुरुत -**

(क) सः मातरं नमन्ति। (नमति, नमामि, नमसि,)

(ख) अयं छात्रः विद्यालयं गच्छन्ति। (गच्छामि, गच्छति, गच्छतः)

(ग) अहं प्रतिदिनं पुस्तकं पठति। (पठसि, पठन्ति, पठामि)

(घ) इयं नदी काश्यां प्रवहसि। (प्रवहन्ति, प्रवहामि, प्रवहति)

(ङ) त्वं पुस्तकं नयति। (नयसि, नयामि, नयन्ति)

**6. संस्कृतभाषायाम् अनुवादं कुरुत -**

(क) गुरु शिष्यों को पढ़ाते हैं।

(ख) मुनि आश्रम में रहते हैं।

(ग) गुरु वेदों का अभ्यास करते हैं।

(घ) माँ जल लाती है।

**7. शब्दानुसारं चित्रनिर्माणं कुरुत-**

एकवचनम् द्विवचनम् बहुवचनम्

वृक्षः ........ ....... .......

माला ........ ....... .......

पुष्पम् ........ ....... .......

**शिक्षण-सङ्केतः**

संस्कृतवाक्यानि वक्तुम् अभ्यासं कारयत।

कर्तारः सुलभाः लोके विज्ञातारस्तु दुर्लभाः।

## द्वितीयः पाठः

## चित्रपाठः



अयं कः ?

अयं राष्ट्रपिता मोहनदासकरमचन्द-गान्धी।

कथम् अयं राष्ट्रपिता ?

अयं वर्तमानभारतराष्ट्रस्य जनकः अस्ति।

कथम् अयं प्रसिद्धः ?

अयं सत्याग्रहेण अहिंसान्दोलनेन च परतन्त्रं भारतं स्वतन्त्रम्

अकारयत्।




अयं कः ?

अयं अस्माकं राष्ट्रस्य तृतीयः राष्ट्रपतिः डॉ0 जाकिर हुसेनमहाभागः।

कथम् अयं तृतीयः राष्ट्रपतिः ?

अस्य किं वैशिष्ट्यम् आसीत् ?

अयं नूतनायाः प्राथमिक-शिक्षापद्धतेः विशेषज्ञःआसीत्।



अयं कः ?

अयं भारतस्य एकादशः राष्ट्रपति डॉ0 ए0 पी0 जे0 अब्दुलकलामः।

अस्य जन्म कदा अभवत् ?

अस्य जन्म 1931 तमे वर्षे अक्टूबर मासस्य प´ चदशे दिनाङ्के अभवत्।

अस्य जन्म तामिलनाडु प्रान्तस्य रामेश्वर नामके स्थाने अभवत्। कथम् अयं प्रसिद्ध ?

अयं महान् वैज्ञानिकः। ‘‘मिसाइलमैन‘‘ इति नाम्ना प्रसिद्धः अभवत।



अयं कः ?

अयं डॉ0 भीमरावअम्बेडकरमहाभागः।

कथम् अयं प्रसिद्धः ?

स्वतन्त्रभारतस्य संविधाननिर्माणे अस्य अपूर्वं महत्त्वपूर्णंच योगदानम् आसीत्।



इयं महाराज्ञी लक्ष्मीबाई।

किमर्थम् इयं प्रसिद्धा ?

इयं लक्ष्मीबाई 1857 तमे वर्षे प्रथम स्वातंत्र्य

संग्रामस्य वीरांगना आसीत्। त्रयोविंशतिवर्षायु प्राप्ता इयं राजमहिषी आंग्लसाम्राज्यस्य सैन्यबलं प्रतिकर्तुं प्रयत्नवती। रणक्षेत्रे वीरगतिं प्राप्तवती परञ्च यावज्जीवनं आंग्लशासकानां झाँसीनगरातिक्रमणं नाङ्गीकृतवती।



इयं का ?


इयं 'भारतकोकिला' श्रीमतीसरोजिनीनायडूमहाशया।

कथम् इयं 'भारतकोकिला' ?

इयं विदुषी कवयित्री सुमधुरभाषिणी च आसीत्।

इयं स्वतन्त्रभारते उत्तरप्रदेशस्य

प्रथमं राज्यपालपदम् अभूषयत्।



इयं का ?

इयं प्रियदर्शिनी इन्दिरागान्धी।

इयं कथं प्रसिद्धा ?

इयम् अस्माकं देशस्य प्रथम-महिला-प्रधानमन्त्री आसीत्।

सर्वे जनाः इमां कुशलप्रशासिकारूपेण श्रद्धया स्मरन्ति।



इयं का ?

इयं भारतानुरागिणी परमविदुषी डॉ0 एनीबेसेण्ट महोदया।

अस्याः का विशेषता ?

इयं जन्मना आङ्ग्लदेशीया।

इयं हिन्दू-विश्वविद्यालयस्य निर्माणाय प्रभूतं धनं विस्तृतं भूखण्डं

च अददात्। अस्याः भाषणेषु रचनासु च संस्कृतवाङ्मयस्य

संस्कृतभाषायाः च गौरवं प्रकाशितम् अस्ति।

इयं देशस्य स्वतन्त्रतायै महत्त्वपूर्णं योगदानम् अकरोत्।

**लखनऊनगरम्**

लखनऊनगरम् उत्तरप्रदेशस्य राजधानी अस्ति।

इदं प्राचीनं सुरम्यं च नगरम् अस्ति।

अत्र बहूनि दर्शनीयानि स्थलानि सन्ति, यथा-रेजीडेंसीस्थलम्,

इमामबाड़ाभवनम्, सचिवालयश्च।

इदं किम ?



इदं **रेजीडेंसीस्थलम्** अस्ति।

इदम् अस्माकं देशभक्तानाम् आत्मत्यागं स्मारयति।

प्रथमे स्वतन्त्रतासंग्रामे 1857 तमे वर्षे भारतीयाः वीराः

आङ्ग्लशासनस्य यदा विरोधम् अकुर्वन् तदा देश-भक्ताः अत्रापि आङ्ग्लान् आक्रान्तवन्तः। अस्मिन् युद्धे राष्ट्रभक्तैः स्वरक्तं प्रवाहितम्। तेषां त्यागेनैव स्वतन्त्रतायाम् एकं सोपानं निर्मितम्।



इदं **सचिवालयभवनम्** अस्ति।

अस्मिन् भवने विधानसभायाः विधानपरिषदश्च अधिवेशनानि भवन्ति।

अस्मिन् एव भवने स्थित्वा राज्यस्य मन्त्रिणः सचिवाः अन्ये

चाधिकारिणः राजकार्यं स×चालयन्ति। सचिवालये एव

उत्तरप्रदेशशासनस्य मुख्यः कार्यालयः अस्ति।

इदं किम् ?



इदं आंचलिक-विज्ञान-केन्द्रम् अस्ति।

किमर्थम् इदं प्रसिद्धम् ?

इदं हि अनुभवाधारित शिक्षा प्रदानाय विख्यातं वर्तते।

इदं केन्द्रं लखनऊनगरस्य मध्ये स्थितं अस्ति।

अस्मिन् केन्द्रे् अन्वेषणकक्षम् इति नाम्नः भवनमस्ति।

अस्य कक्षे भूजलीयान्वेषणं जैव प्रौद्योगिकीक्रान्तिः व्यावहारिक विज्ञानं चेति तिस्त्रः दीर्घिकाः सन्ति।

इदम् **इमामबाड़ा**-भवनम् अतिमनोहरम् अस्ति



इदम् अवधशासकानां स्मारकम् अस्ति।

अस्य भवनस्य छदिः अतिविस्तृता अस्ति। इयं स्तम्भैः विनापि

बहुकौशलेन निर्मिता अस्ति। अस्मिन् एकं विचित्रं सोपानमण्डलम् अस्ति।

तत्र नवागन्तुकाः बहुधा मार्गं विस्मरन्ति।

अत एव जनाः इदं भवनं 'भूलभुलैया' इति वदन्ति।

**शब्दार्थः**

**सत्याग्रहेण** = सत्य के लिए मन, वचन और कर्म से दबाव डालना। **अन्यत्** = और। **अयच्छत्** = दिया। **कवयित्री** = कविता करने वाली। **असहत** = सहा। **अभूषयत्** = शोभित किया। **प्रेषितवान्** = भेजा। **भारतानुरागिणी** = भारतदेश से प्रेम रखने वाली। **प्रभूतम्** = बहुत। **सुरम्यम्** = अतिसुन्दर। **आक्रान्तवन्तः** = सताये, डराये। **स्मारयति** = याद दिलाती है। **विचलन्ति स्म** = विचलित होते थे। **छदिः** = छत। **स्तम्भैः विनापि** = खम्भों के बिना भी। **अधिवेशनानि** = बैठकें।

अभ्यासः

**1. उच्चारणं कुरुत पुस्तिकायां च लिखत-**

राष्ट्रपिता अहिंसान्दोलनेन त्यागेनैव कवयित्री संस्कृतवाङ्मयस्य

आक्रान्तवन्त अविष्कृताः, ज्योतिर्विद्, समर्थितम्, ्त्रयोविंशतिवर्षायु,

साम्राज्यस्य, भूजलीयान्वेषणम्, अन्वेषणकक्षम्।

**2. एकपदेन उत्तरत-**

(क) 'राष्ट्रपिता' नाम्ना कः प्रसिद्धः ?

(ख) ''मिसाइलमैन'' इति नाम्ना कः प्रसिद्धः ?

(ग) उत्तर-प्रदेशस्य प्रथमं राज्यपालपदं का अभूषयत् ?

(घ) इन्दिरागान्धी कस्य सुपुत्री ?

(ङ) उत्तरप्रदेशस्य राजधानी का ?

(च) 'शून्यम्' इति अंकस्य आविष्कर्ता कः आसीत् ?

**3. पूर्णवाक्येन उत्तरत-**

(क) डॉ0 भीमरावअम्बेडकरस्य संविधाननिर्माणे कीदृशं योगदानमासीत् ?

(ख) श्रीमती सरोजिनीनायडू: किं पदमभूषयत् ?

(ग) जनाः इन्दिरां केन रूपेण स्मरन्ति ?

(घ) डॉ0 एनीबेसेण्टमहोदया हिन्दू-विश्वविद्यालयाय किम् अददात् ?

(ङ) रेजीडेंसीस्थले भारतभक्तैः किं प्रवाहितम् ?

ध्यातव्यम् -

"इदम्" शब्दस्य पुंल्लिङ्.गे 'अयम्' इति रूपं भवति। स्त्रीलिङ्गे 'इयम्'इति रूपं भवति। नपुंसकलिङ्गे 'इदम्' इति रूपं भवति। पाठे 'राष्ट्रपिता' इति पुंल्लिङ्गविशेष्येण सह 'अयम'् इति रूपं प्रयुक्तम्। एवमेव 'भारतकोकिला' इति स्त्रीलिङ्गविशेष्येण सह 'इयम्' इति प्रयुक्तम्। नगरम् इति नपुंसकलिङ्गेन सह 'इदम्' इति प्रयुक्तम्। अनेन अयं नियमः अभवत् यत् सर्वनामशब्दाः विशेषणरूपे प्रयुक्ताः भवन्ति। विशेष्ये यत् लिङ्गम्, या विभक्तिः, यत् वचनं च भवति, विशेषणे अपि तत् लिङ्गम्, सा विभक्तिः, तत् वचनं च भवति। सर्वनामशब्दाः- इदम्, तत्, किम्, यत्, अदस्, एतत् चेत्यादयः सन्ति, यथा-

(क) अयं राष्ट्रपिता।

(ख) इयं भारतकोकिला।

(ग) इदं प्राचीनं नगरम्।

**4. सन्धि-विच्छेदं कुरुत -**

पदम् सन्धिविच्छेदः

यथा- अहिंसान्दोलनेन अहिंसा$आन्दोलनेन


अत्रापि .......................................


चासहत .......................................

नातिदूरे .......................................

**5. म×जूषातः-सर्वनाम-पदानि चित्वा चित्रानुसारं वाक्यानि रचयत -**

अयम् इयम् इदम् इमाः इमे



**6. (क) म□जूषातः उचितपदानि चित्वा वाक्यानि पूरयत-**

(1857 तमे वर्षे, सत्याग्रहेण, विदुषी कवयित्री, लखनऊनगरे ्)

(क) महात्मागाँधी.........परतन्त्रं भारतं स्वतन्त्रम् अकारयत्।

(ख) लक्ष्मीबाई...................प्रथम स्वातंत्र्य संग्रामस्य वीरांगना आसीत्।

(ग) श्रीमतीसरोजिनीनायडूमहाशया.................................आसीत्।

(घ) विज्ञान-आंचलिक-केन्द्रम्....................स्थितमस्ति।

**(ख) उचितं संयोजनं कुरूत-**

(क) रेजीडं ेसीस्थलम् अनुभवाधारित शिक्षणप्रदानाय।

(ख) इमामबाड़ा प्रदेशस्य मुख्यकार्यालयः।

(ग) सचिवालयः देशभक्तानाम् आत्मत्यागम्।

(घ) विज्ञान-आंचलिक-केन्द्रम् अवधशासकानां स्मारकम्।

**7- संस्कृतभाषायाम् अनुवादं कुरुत –**

(क) महात्मा गान्धी ने देश के लिए कार्य किया।

ख) यहाँ बहुत दर्शनीय स्थल हैं।

(ग) इस स्मारक को देखने लोग आते हैं।

(घ) रेजीडेंसी-स्थल पर देशभक्तों को याद करते हैं।

(ङ) राजभवन में राज्यपाल रहते हैं।

शिक्षण-सङ्केतः

क) कक्षायां छात्रैः अनुच्छेदवाचनं कारयत।

(ख) तत्-किम्-एतत्-शब्दरूपाणां लेखनं वाचनं च कारयत।

**अपन्थानं तु गच्छन्तं सोदरोऽपि विमु×चति।**

## तृतीयः पाठः

## अभिलाषः

दयामय! देव! दीनेषु दयादृष्टिः सदा देया ।

प्रतिज्ञा दीनरक्षाया दयालो! जातु नो हेया ।।

मनुष्या मानवा भूत्वा इदानीं दानवा जाताः ।

तदेषा मूढता देशाद् द्रुतं दूरे त्वया नेया ।।

त्वदुपदेशामृतं त्यक्त्वा विपन्नो हन्त लोकोऽयम् ।

तदुद्धाराय चैतेषां प्रभो! गीता पुनर्गेया ।।

किमधिकं ब्रूमहे भगवन्! विनीतप्रार्थनैकेयम् ।

यदेते बालकाः स्वीयाः प्रभो नो विस्मृतिं नेयाः।।

### शब्दार्थः

**दयादृष्टिः** = कृपापूर्ण भाव। **देया** = देना चाहिए। **जातु** = कदाचित् (कभी)। **नो** = नहीं। **हेया** = छोडें़। **जाताः** = हो गये हैं। **इदानीं** = इस समय। **मूढता** = अज्ञानता। **द्रुतम्** = शीघ्र। **नेया** = ले जानी चाहिए। **त्वदुपदेशामृतम्** = तुम्हारे उपदेशरूपी अमृत को। **त्यक्त्वा**

= छोड़कर। **विपन्नः** = दु:खी। **हन्त** = खेद है। **ब्रूमहे** = कहें। **गेया** = गायी जानी चाहिए। **स्वीयाः** = अपने। **विनीतप्रार्थनैकेयम्** = (विनीत+प्रार्थना+ एका+इयम्) विनम्र प्रार्थना एक यह।

अभ्यासः

**1. उच्चारणं कुरुत पुस्तिकायां च लिखत-**

दीनरक्षायाः, त्यक्त्वा, लोकोऽयम्,

पुनर्गेया , विनीतप्रार्थनैकेयम् , तदुद्धाराय

**2. एकपदेन उत्तरत -**

(क) दीनेषु का देया ? (ख) कस्याः प्रतिज्ञा न हेया ?

(ग) मूढता कस्मात् दूरे नेया ? (घ) मानवानाम् उद्धाराय पुनः का गेया ?

**3. पाठात् उचितपदानि चित्वा वाक्यं पूरयत -**

(क) दीनरक्षायाः ................................................................. नो हेया।

(ख) मूढता देशात् ........................................................... नेया।

(ग) उद्धाराय ........................................................................... पुनः गेया।

(घ) यदेते बालकाः .................................................................... नेयाः।

**4. रेखांकितपदानि आधृत्य प्रश्ननिर्माणं कुरुत -**

यथा-दीनेषु दयादृष्टिः सदा देया। दीनेषु का देया ?

(क) मूढता देशात् दूरे त्वया नेया।

(ख) गीता पुनर्गेया।

**5. उदाहरणानुसारं लिखत -**

यथा- लोकोऽयम् = लोकः + अयम्

(क) त्वदुपदेशामृतं =

(ख) किमधिकं =

(ग) यदेते =

(घ) चैतेषां =

(ङ.) पुनर्गेया =

**6. संस्कृतभाषायाम् अनुवादं कुरुत -**

(क) मेरी यह नम्र प्रार्थना है।

(ख) देश से गरीबी दूर करें।

(ग) कल्याण के लिए शिक्षा दें।

(घ) स्वास्थ्य के लिए प्रदूषण दूर करें।

**7. उचितकथनानां समक्षम् 'आम्' अनुचितकथनानां समक्षं 'न' इति लिखत -**

(क) दीनेषु दयादृष्टिः देया। .......................

(ख) दीनरक्षायाः प्रतिज्ञा हेया। .......................

(ग) प्रतिदिनं दन्तधावनं कुर्यात्। .......................

(घ) सुन्दरं लेखं न लिखेत्। ......................

**शब्दार्थः**

ध्यातव्यम् - धातोः योग्यार्थबोधनाय (चाहिए) ‘यत्’ प्रत्ययः भवति, यथा-दातुं योग्यम् = देयम् (देना चाहिए)। अस्य त्रिषु लिङ्गेषु रूपाणि भवन्ति। यथा- दा$यत् =देयम् (नपंु0), देया (स्त्री0), देयः (पु0) (देना चाहिए)।

धातुः +प्रत्ययः - रूपम्

दा +यत् = देयम्नी

नी +यत् = नेयम्

हा + यत् = हेयम्

गै +यत् = गेयम्


**शिक्षण-सङ्केतः**

1. पद्यानां सस्वरवाचनं कारयत।

2. पाठे वर्णितानाम् अभिलाषाणां छात्रैः अभ्यासं कारयत।

मनोरञ्जनाय

**मत्कुण-पिपीलिका-संवादः**



**मत्कुणः उवाच-**

कथय भगिनि! किं तव अभिधानम् ? कृत्वा स्वयं श्रमं भोक्तव्यम्

कुत्र तव वास-स्थानम् ? इति मे अस्ति निजं मन्तव्यम्।

कुतः सम्प्रति आगच्छसि ? अतः श्रमे सततं संलग्ना

त्वरितं कुत्र गच्छसि ? नैव कदापि गतिर्मे भग्ना ।।

अङ्गं तव अतिशय-सुकुमारम् त्वं सदैव पर-तल्पे लीनः

वहसि तथापि अहो! गुरु-भारम्। पीत्वा पर-रुधिरं खलु पीनः।

धावन्ती गच्छसि अविरामम् किन्तु इदं न उचित-कर्तव्यम्

कथय कदा कुरुषे विश्रामम् ? न इदं वेद-शास्त्र-मन्तव्यम् ।।

**पिपीलिका उवाच-**

मम पिपीलिका इति अभिधानम् अतः श्रमं कृत्वा भोक्तव्यम्वि

वरे विद्धि मदीयं स्थानम्। इति भवताऽपि मतं मन्तव्यम्।

अति दूरादिह मम आगमनम् अस्तु, जहीहि, देहि पन्थानम्

दूरे एव पुनर्मम गमनम्।। दूरे मम गन्तव्य-स्थानम् ।।

शब्दार्थः

**मत्कुणः** = खटमल। **पिपीलिका** = चींटी। **अभिधानम्** = नाम। विवरे = बिल में । **विद्धि** = जानो। **पर-तल्पे** = दूसरे के बिस्तर पर। **जहीहि** = छोड़ो।

**विशेषः-** मत्कुण-पिपीलिकयोः मध्ये स×जातस्य उपर्युक्तरोचक-संवादस्य स्वाध्यायं कारयत तथा पिपीलिकायाः श्रमशीलतया आत्मनिर्भरतया च प्राप्तसंदेशं छात्रान् श्रावयत।

क्रियासिद्धिः सत्त्वे भवति महतां नोपकरणे।

## शब्दार्थः

कश्चिद् = कोई। प्रासादम् = राजमहल। अतोषयत् = सन्तुष्ट किया। सत्कृतः = सत्कार किया गया। अभीष्टम् = मनोवाञ्छित, मनचाहा। वरय = वरदान माँगो। स्पृश्यमानाः = छुये गये। भवन्तु = हो जाएँ। तथास्तु = ऐसा ही हो। अन्तर्हितः = अन्तर्धान हो गया। प्रविष्टः = प्रवेश किया हुआ। अस्पृशत् = स्पर्श किया। स्पृष्टानि = छुये हुए। सद्यः = तुरन्त। जातानि = हो गया। नितराम् =पूरी तरह से। अतुष्यत् = सन्तुष्ट हो गया। महती = बहुत बड़ी। पिपासा = पीने की इच्छा। जाता = उत्पन्न हुई। पातुम् = पीने के लिए। उद्यतः = तैयार हुआ। स्पृष्टम् = छुआ हुआ या स्पर्श किया गया। सुवर्णपिण्डम् = सोने का गोला। उक्तम् = कहा गया। मृषा = झूठ। आगता = आयी। समाश्वासयितुम् = आश्वस्त करने के लिए, भरोसा दिलाने के लिए। प्रवृत्तः = लग गया। अङ्के उपवेशयति स्म = गोद में बैठाया। हन्त = अत्यन्त दुःख है। प्रतिमा = मूर्ति। सञ्जाता = हो गयी। व्यलपत् = विलाप किया। निवर्तयतु = लौटा लें, वापस ले लें।

## अभ्यासः

**1. उच्चारणं कुरुत पुस्तिकायां च लिखत-**

कश्चित् स्वस्त्यस्तु मुनिनैवम् इत्युक्त्वा

साधूक्तम् समाश्वासयितुम् शोकेनोच्चैः तत्रैवान्तर्हितः

**2. पूर्णवाक्येन उत्तरत -**

(क) मायादासः कः आसीत् ?

(ख) मायादासः किं अयाचत ?

(ग) 'अभीष्टं वरं वरय' इति कः कं प्रति अवदत् ?

(घ) 'हन्त! कुमारी सुवर्णप्रतिमा सञ्जाता' इदं वाक्यं कः अवदत् ?

(ङ) किं दुःखस्य कारणम् ?

**ध्यातव्यम्**

(क) धातोः भूतकालस्य अर्थे क्तप्रत्ययस्य प्रयोगः भवति यथा- कृक्त =कृतम् (किया गया)। पठ्+क्त = पठितम् (पढ़ा गया)। अस्य प्रयोगः क्रियारूपेण विशेषणरूपेण च भवति। अस्य रूपाणि त्रिषु लिङ्गेषु भवन्ति।

(ख) धातोः तव्यत् प्रत्ययस्य प्रयोगः योग्यार्थबोधनाय (चाहिए) भवति, यथा - कृ+तव्यत् = कत्र्तव्यम्। मन+तव्यत् = मन्तव्यम्। अस्यापि प्रयोगः क्रियारूपेण विशेषणरूपेण च भवति। अस्य रूपाणि त्रिषु लिङ्गेषु भवन्ति।

**3. उदाहरणानुसारं सन्धि-विच्छेदं कुरुत-**

सन्धिपदम् सन्धिविच्छेदः पूर्वपदस्य अन्तिमपदस्य द्वयोः योगेन अन्तिमः वर्णः पूर्ववर्णः सन्धियुक्तवर्णः साधूक्तम् साधु$उक्तम् उ उ ऊ

सुन्दराणीमानि ...........

चावदत्....................

शोकेनोच्चैः ...............

सत्कारेणातोषयत्..........

**4. संस्कृतभाषायाम् अनुवादं कुरुत-**

(क) उसका नाम केशव था।

(ख) उसके पिता का नाम रामदास था।

(ग) उसकी माता का नाम मायादेवी था।

(घ) एक बार वह बाजार गया।

(ङ) वहाँ वह अपने मित्र से मिला।

**5. मञ्जूषातः क्रियापदानि चित्वा वाक्यानि पूरयत-**

जाता जातानि अयाचत आनयत् वरय

(क) मुनिः अवदत् अभीष्टं वरम्................।

(ख) सः भूपतिः वरम्..................।

(ग) तेन स्पृष्टानि वस्तूनि सद्यः एव सौवर्णानि .............।

(घ) तेन स्पृष्टा म×जरी सुवर्णमयी ..........।

(ङ) मायादासः उद्यानात् जलम्....................।

**6. अस्य पाठस्य कथां स्वशब्देषु हिन्दीभाषायां लिखत।**

**7. चित्रं दृष्ट्वा मञ्जूषातः पदानि च प्रयुज्य वाक्यानि रचयत-**



**शिक्षकः छात्रः प्रश्नम्**

पृच्छति लिखति अभ्यासपुस्तिकायाम्

श्यामपट्टे छात्राः पृच्छन्ति लिखन्ति

.यथा-शिक्षकः श्यामपट्टे लिखति। ......

शिक्षण-सङ्केतः

लोभे आधारिताः अन्याः कथाः बालकान् श्रावयत।

**केतकीगन्धमाघ्रातुं स्वयमायान्ति षट्पदाः।**

## पञ्चमः पाठः

# वयं स्वाधीनाः

लोकेऽधुना वयं स्वाधीनाः।

तिमिरो गतः प्रकाशो जातः।।

क्रीडार्थं दिवसोऽप्यायातः।

नव्यं युगं नवीनो देशो वार्तागताखिला प्राचीना।।

लोकेऽधुना वयं स्वाधीनाः ।। 1 ।।

पद्मश्रीर्विहसति पुलिनेषु।

हासः खेलति जनाधरेषु।

धनान्विताः सर्वे दृश्येरन् शिष्येरन् देशे न हि दीनाः।।

लोकेऽधुना वयं स्वाधीनाः ।। 2 ।।

स्त्रीपुंसयोः समोऽस्त्यधिकारः।

स्वप्नो जातोऽयं साकारः।

संविधाननवपथानुकूला शासननीतिर्नवा नवीना।।

लोकेऽधुना वयं स्वाधीनाः ।। 3 ।।

शान्तिर्मिलति सुरक्षान्यायः।

सहकारः सहचरः सहायः।

उच्चाशयता पुना राजते मनसि भावना कापि न हीना ।।

लोकेऽधुना वयं स्वाधीनाः ।। 4 ।।

-डॉ0 आजाद मिश्रः 'मधुकर'

शब्दार्थः

**अधुना** = इस समय। **तिमिरः** = अन्धकार। **दिवसोऽप्यायातः** = (दिवसः+अपि+ आयातः) दिवस भी आ गया। **नव्यम्** = नया। **वार्तागताखिला प्राचीना** =(वार्ता$गता$ अखिला) बात सम्पूर्ण रूप से समाप्त हो गयी, पुरानी परिस्थितियां अब नहीं रहीं। **पद्मश्रीः** = कमलों की शोभा। **पुलिनेषु** = तटों पर। **अधरेषु** = ओठों पर। **धनान्विताः**=धन से युक्त, धनवान्। **दृश्येरन्** = दिखलायी दें। **शिष्येरन्**=शेष रहें। **समोऽस्त्यधिकारः**=(समः+अस्ति+अधिकारः) समान अधिकार है। **सहकार** = सहयोग। **सहचरः** = साथी। **उच्चाशयता** = उच्च विचार।

**1. उच्चारणं कुरुत पुस्तिकायां च लिखत -**

क्रीडार्थम् दिवसोऽप्यायातः उच्चाशयता स्वतन्त्रतायाः

पद्मश्रीर्विहसति धनान्विताः शिष्येरन् समोऽस्त्यधिकारः

**2. पूर्णवाक्येन उत्तरत-**

(क) अधुना लोके वयं कीदृशाः स्मः ?

(ख) अखिला प्राचीना वार्ता किम् अभवत् ?

(ग) पुलिनेषु का विहसति ?

(घ) अस्माकं कः स्वप्नः साकारः जातः ?

(ङ) इदानीं शासननीतिः कीदृशी अस्ति ?

**3. सन्धि-विच्छेदं कुरुत -**

पदम् सन्धि-विच्छेदः

जनाधरेषु ....................................

पथानुकूला ....................................।

स्वाधीनाः ....................................।

**4. समासविग्रहं कुरुत -**

पदम् समासविग्रहः

शासननीतिः शासनस्य नीतिः

भोजनालयः ...........................

पाठशाला ............................

वटवृक्षः ............................

**5. उपसर्गाणां क्रियाणां च योगं कृत्वा पदनिर्माणं कुरुत-**

यथा- अव+ अकिरत् = अवाकिरत्

प्र + अचलत् = ............................

आ + हसति = ............................

सम् + अकरोत् = ............................

परा + अवर्तत = ............................

उप+अगच्छत् = ............................

वि +हसति = .........................

**6. संस्कृतभाषायाम् अनुवादं कुरुत -**

(क) आज हमारा देश स्वतन्त्र है।

(ख) अन्धकार समाप्त हो गया है।

(ग) जल में कमल खिले हुए हैं।

(घ) समाज में स्त्री-पुरुषों को समान अधिकार प्राप्त है।

(ड़) हम एक साथमिलकर रहते हैं।

**7. श्लोकांशान् योजयत-**

‘क’ ‘ख’

पद्मश्रीर्विहसति पुलिनेषु सहकारः सहचरः सहायः।

स्त्रीपुंसयोः समोऽस्त्यधिकारः हासः खेलति जनाधरेषु।

शान्तिर्मिलति सुरक्षान्यायः स्वप्नो जातोऽयं साकारः।

संविधाननवपथानुकूला मनसि भावना कापि न हीना।

उच्चाशयता पुना राजते शासननीतिर्नवा नवीना।

शिक्षण-सङ्केतः

1. पाठस्य कवितायाः सामूहिकवाचनं कारयत।

2. कवितायाः भावं हिन्दीभाषायां लेखनस्य अभ्यासं कारयत।

## स्मरणीयम्

**रसाणां नामानि**

**कटुः**-कड़वा **तिक्तः-**तीखा

**कषायः-**कसैला **मधुरः**-मीठा

**अम्लः**-खट्टा **लवणः**-नमक

**सम्भावितस्य चाकीर्तिः मरणादतिरिच्यते।**

षष्ठः पाठः

## प्रयत्ने किं न लभेत

जीवने नास्ति किमपि असाध्यम्। प्रयत्नेन सर्वं खलु साध्यम् इति। कर्मनिश्ठाः जनाः विशमपरिस्थितौ स्वकर्तव्यपथात् विचलिताः न भवन्ति। ऐतेशु कर्मवीरेशु

सुधाचन्द्रन्-भागवत सुब्रह्मण्यम चन्द्रषेखर-स्टीफन हाकिंग्समहोदयानां जीवनम् अस्माकं कृते प्रेरणादायकमस्ति।

### सुधाचन्द्रन्



**सुधाचन्द्रन्** महोदया एका प्रसिद्धा नृत्यकलानिपुणा अभिनेत्री अस्ति। अस्याः जन्म तमिलभाशीपरिवारे अभवत्। बाल्यकालादेव सा नृत्याभ्यासं प्रारभत्। दुर्भाग्यवषात् एकस्यां दुर्घटनायां तस्याः दक्षिणपादः भङ्गः अभवत्। प्राणरक्षायै चिकित्सकैः तस्याः दक्षिणपादं षरीरात् पृथक कृतम्। षनैः षनैः सा स्वस्था अभवत्। आत्मबलेन कृत्रिमपादस्य सहाय्येन सा पुनः नर्तनम् आरब्धवती। इदानीं नर्तने अभिनये च तस्याः कीर्तिः राजते।

## भागवत सुब्रह्मण्यम चन्द्रषेखरः



भारतीय क्रिकेटक्रीडायां ‘स्पिन’ इति कलायाः ऐन्द्रजालिकम् **भागवतचन्द्रषेखरं** को न जानाति। अस्य जन्म कर्णाटक प्रान्तस्य मैसूर नगरे 17 मई 1945 तमे वर्षे अभवत्। षैषवे एव चन्द्रषेखरः ‘पोलियो’ इति व्याधिना ग्रस्तः। येन दक्षिणहस्तस्य मणिबन्धः अत्यन्तं प्रभावितोऽभवत्। किन्तु आत्मबलेन क्रिकेटस्पर्धायां कन्दुकक्षेपविधौ तथा निश्णातः अभवत् येन क्रिकेटक्रीडा जगति स ‘स्पिन्’ कलायाम् अद्वितीयः जातः। चन्द्रषेखरः अश्टपंचाषत् (58) टेस्ट स्पर्धासु द्विचत्वारिंषदधिकंषतद्वयम् (242) विकेटं गृहीतवान्। अयं भारतसर्वकारेण ‘पद्मश्रीः’ इति अलङ्करणेन अर्जुन पुरस्कारेण च विभूशितः।

## स्टीफन हांिकंग्स



**स्टीफनहॉकिंग** इति नाम्ना सुप्रसिद्धस्य आङ्ग्ल वैज्ञानिकस्य जन्म 1942 तमेवर्शे जनवरीमासस्य अश्टमे दिनाङ्के अभवत्। अयं बाल्यकालादेव प्रतिभावान् आसीत्। अस्य बुद्धिमत्तां विलोक्य जनाः इमं ‘आईंस्टीन’ इति नाम्ना संबोधयन्ति स्म। अयं स्व अध्ययनकाले संगणकयन्त्रं निर्मितवान्। पुनष्च भौतिकषास्त्रे ‘ष्यामविवर’ (ब्लैकहोल) इति विशयमधिकृत्य षोधकार्यं कृतवान्।

स स्वगृहे सोपानेभ्यः पतितः तथा मोटर न्यूरान’ इति असाध्यरोगेण ग्रस्तः। रोगवषात् षारीरिकदृश्ट्या अषक्तोऽपि स आत्मबलेन स्वकीयं लक्ष्यं प्राप्तुं संघर्शं न त्यक्तवान्। गच्छताकालेन अयं महानुभावः विज्ञानविशयकानि अनेकानि पुस्तकानि लिखितवान्।

‘हॉकिंग विकिरण’ इति अस्य विषिश्टं योगदानमधिकृत्य अस्मै विविधाः पुरस्काराः प्रदŸााः।

अनेनप्रकारेण अस्माभिः ज्ञातं यत् उद्यमेन, साहसेन, धैर्येण आत्मविष्वासेन च स्वलक्ष्यं प्राप्तुं षक्यते।

**शब्दार्थः**

**किमपि=** कुछ भी। **असाध्यम्=** कठिन। **खलु=** निष्चय। **कर्तव्यपथात्=** कर्तव्यसे। **विचलिताः**= विचलित। **बाल्यकालादेव**=बचपन से ही। **प्रारभत्=**आरम्भ किया। **पादभड्.गः** = पैर टूट गया। **ऐन्द्रजालिकम्=** जादूगर। **षैषवे एव** = बचपन में ही। **व्याधिना** = रोग से। **मणिबन्धः**= कलाई। **कन्दुकक्षेपविधौ=** गेंदबाजी (क्रिकेट क्षेत्र में) **निश्णातः**=निपुण। **अश्टपंचाषत्=**अठ्ठावन (58)। **द्विचत्वारिंषतधिकंषतद्वयम्=**दो सौ बयालीस (242)। **एकविंषतितमे वयसि**=इक्कीस वर्श में। **सोपानेभ्यः**=सीढ़ियों से।

**अभ्यासः**

**1.उच्चारणं कुरूत पुस्तिकायां च लिखत-**

असाध्यम्, विशमपरिस्थितौ, दुर्घटनायाम्, पृथक्कृतम्, आत्मबलेन, क्रिकेटक्रीडायाम्, दक्षिणहस्तस्य, प्रभावितोऽभवत्, कन्दुकक्षेपविधौ,

द्विचत्वारिंषदधिकषतद्वयम्, आड्.गलवैज्ञानिकस्य, विशयमधिकृत्य, साहाय्येन, अषक्तोऽपि, स्वकर्Ÿाव्यपथात्, सोपानेभ्यः, अश्टपंचाषत्।

**2.एकपदेन उत्तरत**

(क) सुधाचन्द्रन्महोदयायाः जन्म कस्मिन् परिवारे अभवत् ?

(ख) कस्यां कलायां सा अपूर्वां प्रतिभां प्राप्तवती ?

(ग) चन्द्रषेखरः टेस्टस्पर्धासु कति विकेटं गृहीतवान् ?

(घ) 1978 तमे वर्शे अयं केन पुरस्कारेण सम्मानितः ?

(ड.)स्टीफन हॉकिन्स भौतिकशास्त्रे कस्य विषयम् अधिकृत्य शोधकार्यं कृतवान् ?

**3.पूर्णवाक्येन उत्तरत**

(क) सुधाचन्द्रन् महोदया का अस्ति ?

(ख) भागवत सुब्रह्मण्यचन्द्रषेखरःकेन अलंकरणेन पुरस्कारेण च विभूशितः ?

तस्याः, द्विचत्वारिंशद्धिकंशतद्वयम्, नृत्यकलानिपुणा अभिनेत्री च, संगणकयंत्रम्

**4.सन्धिविच्छेदः कुरुत-**

पदम् सन्धिविच्छेदः

यथा- बाल्याकालादेव बाल्यकात्यात्$ एव

पृथक्कृतम् --------

स्वात्मबलेन --------

प्रभावितोऽभवत् --------

रुग्णस्यापि --------

**5.म×जूषातः पदानि चित्वा वाक्यानि पूरयत-**

(क) सुधाचन्द्रन् महोदया एका सुप्रसिद्धा ..................................... अस्ति।

(ख) इदानीं................................................ कीर्तिः नर्तने अभियने च राजते।

(ग) चन्द्रशेखरः अष्टपंचाशत् टेस्ट स्पर्धासु ................... विकेटं गृहीतवान्।

(घ) स्टीफनहाकिंग्स स्व अध्ययनकालेः............निर्मितवान्।

**6.संस्कृतभाशायाम् अनुवादं कुरुत-**

(क) बाल्यकाल से सुधाचन्द्रन् ने नृत्य का अभ्यास प्रारम्भ किया।

(ख) भागवत चन्द्रषेखर का जन्म कर्नाटक के मैसूर नगर में हुआ था।

(ग) क्रिकेट जगत की सर्वाधिक प्रसिद्ध पत्रिका 'विजडन' है।

(घ) हम मेहनत, साहस, धैर्य से अपने लक्ष्य को प्राप्त कर सकते हैं।

**7.अधोलिखित पदानि प्रयुज्य वाक्यरचनां कुरुत-**

यथा-अभिनेत्री सुधाचन्द्रन एका अभिनेत्री अस्ति।

कर्णाटक, अद्वितीय, संगणक, यंत्रम

शिक्षणसङ्.केतः-

अस्य पाठस्य छात्रैः अन्यदपि षीर्शकम् इति चिन्तयत।

।। साहसे श्रीः प्रतिवसति ।।

## सप्तमः पाठः

# प्रहेलिकाः

दन्तैर्हीनः शिलाभक्षी निर्जीवो बहुभाषकः।

गुणस्यूतिः समृद्धोऽपि परपादेन गच्छति ।। 1 ।।

शोभितोऽस्मि शिखण्डेन दीर्घैः पक्षैरलङ्कृतः।

राष्ट्रियो विहगश्चास्मि, नृत्यं पश्यन्ति मे जनाः।। 2 ।।

पठितो नास्म्यहं किञ्चित् तथापि साक्षरोऽस्म्यहम्।

पादैर्विनैव गच्छामि कथयामि विना मुखम् ।। 3 ।।

क्वचित् प्रस्तरतुल्योऽस्मि क्वचिच्च तरलं पुनः।

क्वचिद्वायुसमं सूक्ष्मं, मां पश्यन्ति सदा जनाः ।। 4 ।।

रेफादौ मकारोऽन्ते वाल्मीकिः यस्य गायकः।

सर्वश्रेष्ठं यस्य राज्यं वद कोऽसौ जनप्रियः ।। 5 ।।

## अभ्यासः

**1. उच्चारणं कुरुत पुस्तिकायां च लिखत-**

दन्तैर्हीनः पक्षैरलङ्कृतः क्वचिद्वायुसमम्

साक्षरोऽस्म्यहम् पादैर्विनैव प्रस्तरतुल्योऽस्मि

शब्दार्थः

**दन्तैः हीनः** = दाँतो से रहित (बिना दाँत के)। **शिलाभक्षी** = पत्थर खाने वाला। **निर्जीवः** = बेजान। **गुणस्यूतिः** = सूत (रस्सी) से सिला। **समृद्धोऽपि** = धनवान होने पर भी। **परपादेन** = दूसरे के पैर से। **शिखण्डेन** = पंख (मयूर पिच्छ) से। **विहगश्चास्मि** = (विहगः+च+अस्मि) और पक्षी हूँ। **पादैर्विनैव** = (पादैः+विना+एव) पैरों के बिना ही। **साक्षरोऽस्म्यहम्** = (साक्षरः+अस्मि+अहम्) मंै साक्षर हूँ, अक्षर सहित। **प्रस्तर-तुल्यम्** = पत्थर की तरह (कठोर)। **रेफादौ** = प्रारम्भ में रेफ (र)।**उपानह्** = जूता (इसका रूप 'उपानत्-उपानहौ-उपानहः' -जैसा चलता है।)

**2. एकपदेन उत्तरत -**

(क) दन्तैः हीनः शिलाभक्षी कः अस्ति ?

(ख) पादैः विना कः गच्छति ?

(ग) राष्ट्रियः विहगः कः अस्ति ?

(घ) कस्य राज्यं सर्वश्रेष्ठम् ?

(ङ) पाठे जलस्य कति रूपाणि वर्णितानि ?

**3. मञ्जूषातः पदानि चित्वा वाक्यानि पूरयत-**

न विना सदा पुनः च

यथा- छात्राः ..सदा.....शिक्षकं नमन्ति।

(क) असत्यवचनं ....................कथनीयम्।

(ख) प्रतिदिनं दन्तधावनं स्नानं.................. कुर्यात्।

(ग) जलं .................... जीवनं न सम्भवति।

(घ) स्वपाठं ................ पठ।

**4. पाठे प्रयुक्तानि लट्लकारस्य क्रियापदानि लिखत-**

यथा- गच्छति, अस्मि ................

**5. सन्धि-विच्छेदं कुरुत -**

पदम् सन्धि-विच्छेदः

समृद्धोऽपि ....................

शोभितोऽस्मि ....................

मकारोऽन्ते .....................

क्वचिच्च ....................

**6. उपयुक्तशब्देन वाक्यं पूरयत-**

(क) मयूराः ......................................। ( नृत्यति, नृत्यन्ति।)

(ख) जनाः ..................................... पिबन्ति। (जलम्, जलेन।)

(ग) जनाः चित्राणि ........................ । (पश्यन्ति, पश्यति।)

**7. रेखांकितपदानि आधृत्य प्रश्ननिर्माणं कुरुत -**

यथा- मयूरस्य नृत्यं जनाः पश्यन्ति। मयूरस्य नृत्यं के पश्यन्ति ?

(क) उपानत् परपादेन गच्छति।

(ख) पत्रं पादेन विना गच्छति।

(ग) हिमः जलस्य एव रूपम् अस्ति।

**8.चित्रं दृष्ट्वा मञ्जूषातः पदानि च चित्वा वाक्यानि रचयत -**



*पश्यन्ति, जनाः, बालकाः, देविका, केशवः, खेलन्ति, खगाः, पश्यति*

*पुष्पाणि, चित्रपतङ्गाः, सूर्यः, उड्यन्ते, कूजन्ति, उदयति, सन्ति।*

.शिक्षण-सङ्केतः

क) बालकाः परस्परं प्रहेलिकाः पृच्छन्तु, इत्थं कथयत।


(ख) बालकैः अन्यप्रहेलिकानां सङ्ग्रहं कारयत।

प्रहेलिकायाः उत्तराणि-ख्जलम्, पत्रम्, रामः, उपानत्(ह्), मयूरः,

**धर्मार्थकाममोक्षाणामारोग्यं मूलमुत्तमम्।**

अष्टमः पाठः

# श्रम एव विजयते



अमेरिकादेशे एकस्मिन् स्थाने सैनिकानाम् आवासाय निर्माणकार्यं प्रचलद् आसीत्। तत्र द्वारादिनिर्माणहेतोः काष्ठस्य गुरुतरः खण्डः नीयते स्म। केचित् सैनिकाः बृहत्कायं तं काष्ठखण्डं भूमेः उत्थाप्य यानम् आरोपयितुं यतमानाः आसन्। किन्तु काष्ठस्य अतिभारत्वात् बहुप्रत्यये अपि ते अक्षमा अभवन्।तेषां सैनिकानाम् एकः नायकः अपि आसीत्, य दूरत एव अधिकबलप्रयोगाय तान् प्रेरयति स्म।

अत्रान्तरे कश्चन् तुरङ्गाधिरूढः तत्र आगतः। स भारवहने अक्षमान् सैनिकान् विलोकयन् नायकम् अवदत् - किं पश्यति भवान्? यदि एतेषां सहयोगं भवान् कुर्यात्, तदा कार्यं सुकरं स्यात्।नायकः प्रोवाच - किं न वेत्ति भवान् ? अहम् एतेषाम् अधिकारी अस्मि। कथम् एतैः सह कार्यं कुर्याम्?तत्कथनं श्रुत्वा सः अश्वसादी अश्वाद् अवातरत्, निजं कोटपरिधानं च अवतार्य भूमौ न्यदधात्। ततः असौ काष्ठखण्डस्य उन्नयने सैनिकैः साकं बलसाहाय्यम् अकरोत्। काष्ठखण्डः याने आरोपितः अभवत्। सर्वे तस्य सहयोगं प्राशंसन्। नायकः अपि धन्यवादं वितीर्णवान्।तदनु स आगन्तुकः पुनः अश्वम् आरुह्य नायकम् अभाषत- महाशय! यदा कदाचिद् ईदृशः अवसरः आपतेत्, प्रधानसेनापतिः वाशिंगटनः स्मर्यताम्। स पुनरपि आगमिष्यति। स्वसेनापतिं वाशिंगटनम् अभिजानन् स नायकः लज्जितो भूत्वा क्षमाम् अयाचत।

**शब्दार्थः**

**द्वारादिनिर्माणहेतोः** = द्वार आदि के निर्माण के लिए। **उत्थाप्य** = उठाकर। **काष्ठस्य** = लकड़ी का। **यानम्** = सवारी। **आरोपयितुं** = चढ़ाने के लिए। **यतमानाः** = प्रयत्नशील। **अतिभारवत्वात्** = अधिक भारी होने से। **अक्षमाः** = असमर्थ। **दूरतः** = दूर से। **तुरगाधिरूढः** = घोड़े पर सवार। **सुकरम्** = सरल (आसान)। **परिधानम्** = वस्त्र। **आगच्छन्** = आता हुआ। **अश्वसादी** = घुड़सवार। **अवधेयम्** = याद रखें। **प्राशंसन्** = प्रशंसा किये। **आपतेत्** = आये। **स्मर्यताम्** = याद करें। **अभिजानन्** = जानते हुए।

**अभ्यासः**

**1. उच्चारणं कुरुत पुस्तिकायां च लिखत-**

द्वारादिनिर्माणहेतोः काष्ठस्य उत्थाप्य स्मार्यताम्

अतिभारवत्त्वात् आपतेत् आरुह्य आगमिष्यति

**2. पूर्णवाक्येन उत्तरत -**

(क) किमर्थं काष्ठस्य गुरुतरः खण्डः नीयते स्म?

(ख) सैनिकाः कथं बहुप्रत्यये अपि अक्षमाः जाताः ?

(ग) कः दूरतः एव अधिकबलप्रयोगाय तान् प्रेरयति स्म ?

(घ) तुरगाधिरूढः पुरुषः सैनिकान् विलोकयन् नायकं किम् अवदत् ?

**3. अधोलिखितपदानां विभक्तिं वचनं च लिखत -**

पदम् विभक्तिः वचनम्

यथा- सैनिकानाम् षष्ठी बहुवचनम्

अश्वाद् .................... .....................

याने .................... .....................

क्षमाम् .................... .....................

**4. अधोलिखितक्रियापदानां लकारं पुरुषं वचनं च लिखत -**

क्रियापदम् लकारः पुरुषः वचनम्

यथा- अवदत् लङ्. लकारः प्रथमपुरुषः एकवचनम्

भवन्ति .................. ................ ..................

आसीत् .................. ................ ..................

गमिष्यति .................. ................ ..................

अकरोत् .................. ................ ..................

**5. उपसर्गं लिखत -**

पदम् उपसर्गः

यथा- अधिरूढः ...अधि...

प्रोवाच ..................

अभिजानन् ..................

विलोकयन् ..................

**6. मञ्जूषातः पदानि चित्वा वाक्यानि पूरयत -**

आवासाय, काष्ठखण्डम्, नायकः, अश्वसादी, वायुयानस्य।

(क)...................... सैनिकान् प्रेरयति

(ख)...................... गतिः तीव्रा भवति।

(ग)..................... अश्वाद् अवातरत्।

(घ) भूमे उत्थाय .................आरोपयितुम्।

**7. संस्कृतभाषायाम् अनुवादं कुरुत -**

(क) सैनिकों के आवास के लिए निर्माणकार्य चल रहा था।

(ख) उन सैनिकों का एक नायक भी था।

(ग) वह घुड़सवार घोड़े से उतरा।

(घ) कोई भी कार्य बड़ा या छोटा नहीं होता।

(ङ) मैं खाता हुआ नहीं चलता हूँ।

(च) मैं हसँता हुआ पानी नहीं पीता हूँ।

शिक्षण-सङ्केतः

1.कक्षायां छात्रैः पाठस्य अनुच्छेदानां वाचनं कारयत तथा हिन्दीभाषायाम् अर्थ-लेखनस्य गतिविधिं कारयत।

2.‘कर्मप्रधानं जगत्’ इत्युक्तौ संस्कृते पञ्चवाक्यानि लेखयत।

**आत्मवत् सर्वभूतेषु यः पश्यति सः पण्डितः।**

नवमः पाठः

# सुभाषितानि

CSTHXD

क्षणशः कणशश्चैव विद्यामर्थं च चिन्तयेत्।

क्षणत्यागे कुतो विद्या कणत्यागे कुतो धनम्।।1।।

प्रथमे नार्जिता विद्या द्वितीये नार्जितं धनम्।

तृतीये नार्जितो पुण्यं चतुर्थे किं करिष्यति।।2।।

सर्वतीर्थमयी माता सर्वदेवमयः पिता।

मातरं पितरं तस्मात् सर्वयत्नेन पूजयेत्।।3।।

प्रियवाक्यप्रदानेन सर्वे तुष्यन्ति जन्तवः।

तस्मात् तदेव वक्तव्यं वचने का दरिद्रता।।4।।

सत्यं ब्रूयात् प्रियं ब्रूयात् न ब्रूयात् सत्यमप्रियम्।

प्रियं च नानृतं ब्रूयाद् एष धर्मः सनातनः ।।5।।

जाड्यं धियो हरति सिञ्चति वाचि सत्यं

मानोन्नतिं दिशति पापमपाकरोति।

लक्ष्मीं तनोति वितनोति च दिक्षु कीर्तिं

सत्सङ्गतिः कथय किं न करोति पुंसाम्।।6।।

शब्दार्थः

**क्षणशः** = प्रतिपल। **चिन्तयेत्** = चिन्तन करना चाहिए। **नार्जिता** = नहीं प्राप्त किया। **तुष्यन्ति** = तुष्ट होते हैं। **वक्तव्यम्** = बोलना चाहिए। **अनृतम्** = झूठ। **जाड्यं धियः** = बुद्धि की जड़ता। **पापमपाकरोति** = ( पापम्+अपाकरोति) पापों को दूर करती है। **तनोति** = फैलाती है। **दिक्षु** = दिशाओं में। **पुंसाम्** = व्यक्तियों

अभ्यासः

**1. उच्चारणं कुरुत पुस्तिकायां च लिखत-**

क्षणशः कणशश्चैव सर्वदेवमयः पूजयेत्

ब्रूयात् मानोन्नतिम् पापमपाकरोति सत्सङ्गतिः

**2. एकपदेन उत्तरत -**

(क) क्षणत्यागे किं न भवति?

(ख) द्वितीये किं नार्जितम्?

(ग) सर्वतीर्थमयी का अस्ति?

(घ) सर्वे जन्तवः केन तुष्यन्ति?

(ङ) कीदृशं प्रियं न ब्रूयात्?

**3. वाक्यानि पूर्तिं कुरुत -**

(क) कणत्यागे कुतः ................ ।

(ख) तृतीये नार्जितः ............... ।

(ग) सर्वदेवमयः .................. अस्ति ।

(घ) प्रियवाक्यप्रदानेन सर्वे ............ तुष्यन्ति।

**4. संस्कृतभाषायाम् अनुवादं कुरुत -**

(क) माता-पिता की पूजा करनी चाहिए।

(ख) समय का पालन करो।

(ग) बोलने में कैसी दरिद्रता ?

(घ) प्रिय तथा सत्य बोलना चाहिए।

(ङ) प्रियवाक्य प्रदान करने से सभी जन्तु तुष्ट होते हैं।

**5. उपयुक्तकथनानां समक्षम् 'आम्' अनुपयुक्तकथनानां समक्षं 'न' इति लिखत -**

(क) कणत्यागे धनं न भवति।

(ख) विद्यार्थिजीवने विद्या न अर्जनीया।

(ग) मातरं पितरं च सर्वयत्नेन पूजयेत्।

(घ) प्रियवाक्यप्रदानेन सर्वे जन्तवः न तुष्यन्ति।

(ङ) सत्संङ्गतिः किमपि पुंसां न करोति।

**6. अधोलिखित-क्रियापदानां लकारं पुरुषं वचनं च लिखत -**

क्रियापदम् लकारः पुरुषः वचनम्

चिन्तयेत् .................. ............. ...................

करिष्यति .................. ............. ..................

ब्रूयात् .................. ............. ..................

सिञ्चन्ति .................. ............. ..................

**7. रेखांकितपदानि अधिकृत्य प्रश्ननिर्माणं कुरुत -**

यथा- परिश्रमेण सफलता मिलति। केन सफलता मिलति ?

(क) मधुरवचनेन जनाः प्रसन्नाः भवन्ति।

(ख) व्यायामेन शरीरं स्वस्थं भवति।

(ग) मातुः आज्ञां पालयेत्।

(घ) वृक्षैः प्राणवायुः प्राप्यते।

शिक्षण-सङ्केतः

1. सुभाषितश्लोकानां सामूहिकगानं कारयत।

2. श्लोकानां हिन्दीभाषायाम् अर्थं लेखयत।

**एतदपि जानीत-**

**कुछ पशु-पक्षी के संस्कृत नाम-**

**दर्दुरः** = मेढक। **वृकः** =भेड़िया।

**मार्जारी** =बिल्ली। **वृषभः=** बैल।

**बलाकः** =बगुला। **धेनुः** =गाय।

**षट्पदः** =भौंरा। **गजः=** हाथी।

**लूता=** मकड़ी। **मेषः** =भेंड़।

**कुक्कुटः** =मुर्गा। **भल्लूकः** =भालू।

**चातकः=** पपीहा। **वानरः** =वानर।

**घोटकः**/अश्वः= घोड़ा। **कपोतः** =कबूतर।


**चटका=** गौरैया। **शृगालः** =सियार।

## अतिस्नेहः पापशङ्की

दशमः पाठः

## निम्बतरोः साक्ष्यम्पु

पुरा एकस्मिन् ग्रामे मनोहरः धर्मचन्दश्च द्वे मित्रे प्रतिवसतः। तौ विदेशात्धनं अर्जयित्वा नीतवन्तौ। तौ विचारितवन्तौ यद् गृहे इदं धनं सुरक्षितं न स्यात्। एवं विमृश्य तद् धनम् एकस्य वृक्षस्य मूले गत्र्तं विधाय निक्षिप्तवन्तौ। द्वयोर्मध्ये परस्परं मतैक्यम् अभवत् यत् यस्मै आवश्यकता भविष्यति स अपरेण सह आगत्य निष्कास्यति। मनोहरः सरलः सत्यनिष्ठः चासीत् किन्तु धर्मचन्दः अतीव चतुरः छद्मबुद्धिश्च आसीत्।



धर्मचन्दः अन्येद्युः निभृतं गत्वा सर्वं धनम् आहृतवान्। ततश्च धर्मचन्दः मनोहरम् अवोचत्-" मित्र । चलतु, किञ्चद् धनम् आहर्तव्यम्।" द्वौ अपि वृक्षस्य अन्तिकम् आगतवन्तौ। तत्र धनं नासीत्। धर्मचन्दः मनोहरम् आक्षिप्तवान् यत्तेन धनम् अपहृतम् इति। ततस्तौ विवदमानौ राजानं प्रति गच्छतः। द्वयोः विवादं श्रुत्वा राजा अब्रवीत्-"भवतु नाम, श्वः निम्बवृक्षस्य साक्ष्यम् अवाप्य एव कश्चित् निर्णयः भविता।"सत्यनिष्ठः मनोहरः विचारितवान् यद् इदमेव समीचीम्। निम्बतरुः असत्यं न वक्ष्यति। धर्मचन्दोऽपि प्रसन्नः आसीत्।अपरेद्युः राजा द्वाभ्यां सह निम्बवृक्षं प्रत्यगच्छत्। तैः सह समुत्सुकानां जनानां सम्मर्दः अपि आसीत्। ते सर्वे सत्यं ज्ञातुं वा´ □छन्ति स्म।



राजा निम्बवृक्षं पृष्टवान्-''हे निम्बदेव! कथय, धनं केन अपहृतम् ?''''मनोहरेण'' -इति निम्बमूलात्स्वरः प्रकटितः। एतत् श्रुत्वा मनोहरः बाष्पकण्ठः रुरोद अब्रवीत् च-'' महाराज! एष निम्बतरुः असत्यं वक्तुं नार्हति। अत्र काचित् छद्मयोजना वर्तते। अहं सद्य एव प्रमाणितं करोमि।'' मनोहरः शुष्केन्धनं संहृत्य वृक्षमूले निधाय अग्निं प्रज्वालितवान्। तत्कालमेव वृक्षमूलात्- ''रक्षतु-रक्षतु'' इति स्वरसंयोगः श्रुतः। राजा सैनिकान् आदिष्टवान्- तत्रयोऽपि भवेत् तं बहिः आनयतु।'' सैनिकाः वृक्षकोटरे स्थितं जनं बहिः आनीतवन्तः। तं दृष्ट्वा सर्वे विस्मृताः आसन्। यतोहि स धर्मचन्दस्य वृद्धः पिता आसीत्। राजा सर्वम् अपि ज्ञातवान्। स पितरं पुत्रञ्च कारागारे निक्षिप्तवान्। अपि च, तत्सर्वम् धनम् सपुरस्कारं मनोहराय समप्र्य तं सभाजितवान्। विमृश्यत्र सोचकर। गत्र्तंत्र गड्ढा। द्वयोर्मध्ये त्र दोनों के बीच में। छद्मबुद्धिः त्र बेईमान। आहृतवान् त्र निकाल ले आया। अन्तिकम् त्र समीप। भवतु नाम त्र जाने दीजिए। अपरेद्युः त्र दूसरे दिन। समुत्सुक त्र अत्यधिक आतुर। सम्मर्दः त्र भीड़। बाष्पकण्ठः त्र रुंधे गले से। सद्य एव त्र शीघ्र ही। शुष्केन्धनं त्र सूखी लकड़ियाँ । संहृत्य त्र इक्कठा करके। निधाय त्र रखकर। स्वरसंयोगः त्र आवाज का संयोग । विस्मृताः त्र विस्मित या आश्चर्य चकित। सभाजितवान्त्र पुरस्कृत किया। विश्रम्भात् त्र विश्वास

अभ्यासः

**1. उच्चारणं कुरुत पुस्तिकायां च लिखत-**

धर्मचन्दश्च निक्षिप्तवन्तौ द्वयोर्मध्ये

मतैक्यम् निष्कास्यति सत्यनिष्ठः

छद्मबुद्धिश्च आहृतवान् आहर्तव्यम्

**2. एकपदेन उत्तरत-**

यथा- मनोहरस्य मित्रं कः आसीत ? धर्मचन्दः

(क) तौ अर्जितधनं कुत्र निक्षिप्तवन्तौ ?

(ख) मनोरस्य स्वभावः कीदृशः आसीत् ?

(ग) अन्येद्युः सर्वं धनं कः आहृतवान् ?

(घ) वृक्षकोटरे कः आसीत् ?

**3. म×जूषातः क्रियापदानि चित्वा वाक्यानि पूरयत-**

(क) तौ विदेशात् धनं ......................नीतवन्तौ।

(ख) धर्मचन्दः अतीव चतुरः.................आसीत्।

(ग) ततस्तौ विवदमानौ ...................प्रति गच्छतः।

(घ) निम्बतरु........................... न वक्ष्यति।

(ङ) स पितरं पुत्रं □च करागारे....................।

**4. रेखांकित पदेषु कारकस्य नामोल्लेखं कुरुत-**

यथा- स ग्रामं गच्छति। (कर्म कारकम्)

(क) तौ विदेशात् धनं अर्जयित्वा नीतवन्तौ

(ख) स अपरेण सह आगत्य निष्कास्यति

(ग) द्वौ अपि वृक्षस्य अन्तिकम् आगत्वन्तौ

(घ) राजा सैनिकान् आदिष्टवान्

(ड़) सैनिकाः वृक्षकोटरे स्थितं जनं आनीतवन्तः

**5.सन्धि-विच्छेदं कुरूत-**

पदम् सन्धि-विच्छेदः

(क) धर्मचन्दश्च ..................................

(ख) द्वयोर्मध्ये ..................................

(ग) समुत्सुकानाम् ....................................

(घ) शुष्केन्धनम् ...................................

अर्जयित्वा, छद्मबुद्धिश्च, राजानं, असत्य,ं निक्षिप्तवान्।

**6.रेखांकितपदानि अधिकृत्य प्रश्पनिर्माणं कुरुत-**

(क) एकस्मिन् ग्रामे द्वे मित्रे प्रतिवसतः।

(ख) तौ विदेशात् धनं अर्जयित्वा नीतवन्तौ।

(ग) धर्मचन्दः अतीव चतुरः छद्मबुद्धिश्च आसीत्।

**7-संस्कृतभाषायाम् अनुवादं कुरुत-**

(क) एक गाँव में दो मित्र रहते थे।

(ख) वे दोनों विदेश से धन अर्जित कर ले आये।

(ग) मनोहर सरल और सत्यनिष्ठ था।

(घ) सैनिक वृक्ष के कोटर में स्थित व्यक्ति को बाहर ले आये।

**शिक्षण- सङ्केतः**

1. बालकैः स्वशब्देषु कथां लेखयत।

2. अन्यकथां श्रोतुं श्रावयितुं च कथयत।

**ध्यातव्यम्-**

विभक्तिः द्विविधा भवति- 1 कारकविभक्तिः। 2 उपपदविभक्तिः।

1. कारकविभक्तिः- क्रियाम् आदाय या विभक्तिः भवति सा कारकविभक्तिः भवति, यथा- रमेशः ग्रामं

गच्छति, वीरेन्द्रः कन्दुकेन खेलति।


2. उपपदविभक्तिः- पदम् आश्रित्य प्रयुक्ता विभक्तिः 'उपपदविभक्तिः' इति कथ्यते,यथा- ग्रामं परितः वृक्षाः सन्ति (गाँव के चारों ओर वृक्ष हैं)। रामेण सह लक्ष्मणः गच्छति। अत्र 'परितः' (चारोंओर) इति योगे ग्रामपदात् द्वितीया तथा च 'सह' इति योगे रामपदात् प्रयुक्ता तृतीया विभक्तिः

उपपदविभक्तिः अस्ति।

लोभात्, प्रमादात्, विश्रम्भात् त्रिभिर्नाशो भवेन्नृणाम्

एकादशः पाठः

## सिंह-दिलीपयोः संवादः



(महाराजः दिलीपः सिंहं हन्तंु धनुः आकृष्य सज्जः भवति।)

**सिंहः-** (उच्चैः हसन्) महीपाल! तव श्रमः वृथा। भवान् मां हन्तुं समर्थः न भविष्यति।

**दिलीपः-**भवान् कः ? किम् इच्छति ?

**सिंहः-** भगवतः शड.्करस्य सेवकः अहं कुम्भोदरः अस्मि। अहम् एतां धेनुं हनिष्यामि।


**दिलीपः-**भवान् एवं कथं वदति ?

**सिंहः-** माता पार्वती इमं देवदारुवृक्षं पुत्रवत् पालितवती। एकदा एकेन गजेन अस्य वृक्षस्य त्वक् उच्छिन्नम्। गजस्य दुष्कृतेन माता दुःखिता अभवत्। ततः प्रभृति महादेवेन एतस्य रक्षणार्थम् अहम् आदिष्टः। तदा प्रभृति अस्यां गुहायां स्थितोऽस्मि। अद्य भाग्यवशात् एषा धेनुः आगता। अतएव एतां धेनुं त्यजतु।

**दिलीपः-**कुम्भोदर! देवानां देवः महादेवः जगतः रक्षकः परिपालकश्च। परन्तु इयं गुरोः धेनुःमया निश्चयेन रक्षणीया। एतदर्थं एतां परित्यज्य मां भक्षतु।

**सिंहः**-(विहस्य) विस्तृतं साम्राज्यं, नवं यौवनं सुन्दरं शरीरं च विहाय किमर्थं भवान् एकस्याः धेनोः रक्षायैः स्व प्राणान् त्यक्तुमिच्छति। त्यजतु मूर्खत्वम्। धेनोः जीवनस्य अपेक्षया भवतां जीवनं वरम्। यतोहि भवान् जीवितश्चेत् सर्वासां प्रजानां सम्यक् पालनं भविष्यति।

**दिलीपः**-"क्षतात् त्रायते" इति क्षत्रियः कथ्यते। क्षत्रियः सन् मया धेनुः निश्चयेन रक्षणीया। क्षत्रियत्वे नष्टे सति नास्ति कि चित् प्रयोजनं राज्येन प्राणैः वा। अतएव मम शरीरं भक्षयतु। इमां धेनुं त्यज।



**सिंहः**-भवतु, स्व शरीरं समर्पयतु।

(यावत् राजा सिंहस्य पुरतः अवनत्य स्वशरीरं समर्पयति तावत् सिंहः अन्तर्हितः भवति।)

**नन्दिनी (धेनुः)**- राजन्। मया भवान् परीक्षितः। शरणागतानां परित्राणाय भवतः, अनुपमया निष्ठया अहं नितरां प्रसन्नः। अचिरमेव ते कामना पूर्णा भविष्यति।

**हन्तुम् -** मारने के लिए। **वृथा** -व्यर्थ। **महीपाल** -राजा। **पालितवती** = पालन की। **त्वक्** =त्वचा। (पेड़ की छाल) **उच्छिन्नम्=** छील दिया। **दुष्कृतेन** = दुष्टता से। **रक्षणार्थम्** = रक्षा करने के लिए **अदिष्टः** = आदेशित किया गया। **अस्यां गुहायाम्** = इस गुफा में। **धेनुः** = गाय। **ममार्थं=** मेरे लिये। **त्यजतु** (त्यज्) =छोड़िए। **परिपालकः** =पालन करने वाला। **रक्षणीया=** बचाना चाहिए। **मूर्खत्वम्** =मूर्खता। **वरम्=**श्रेष्ठ। **क्षतात् त्रायते=** विपत्ति अथवा चोट से बचाता है। **क्षत्रियत्वे नष्टे सति =**क्षत्रियता के नष्ट होने पर। **कोटिशः=** करोड़ों। दातुम् =देने के लिये। **प्रयोजनम्=** उद्देश्य। **इमां धेनुम्=** इस गाय को। अवनत्य =झुककर। **अन्तर्हितः** = अन्तर्धान हो गया। **गृहीता** =ली। **शरणागतानां परित्राणाय=** शरण में आये हुए की रक्षा के लिए। **नितराम्=** अत्यधिक। **आशिषा** =आशीर्वाद से। **आत्मानुगणं पुत्रम्**= अपने जैसा पुत्र।

**1. उच्चारणं कुरुत पुस्तिकायां च लिखत-**

सिंह-दिलीपयोः हनिष्यामि आत्मानुगुणम् उच्छिन्नम् दुष्कृत्या स्थितोऽस्मि परित्यज्य त्यक्तुमिच्छति जीवितश्चेत् क्षतात् क्षत्रियत्वे अन्तर्हितः

अभ्यासः

माता, पुत्रवत्, भवान्, त्यज, क्षतात्।

**2.पूर्णवाक्येन उत्तरत -**

(क) कुम्भोदरः कस्य सेवकः आसीत् ?

(ख) माता पर्वती कं वृक्षं पुत्रवत् पालितवती ?

(ग) क्षतात् कः त्रायते ?

(घ) राजा कस्य पुरतः अवनत्य स्वशरीरं समर्पयति?

**3-निम्ननलिखित पदानि निर्देशानुसारं परिवर्तयत-**

यथा सिंहः (प्रथमा बहुवचने) सिंहाः

बालकः (प्रथमा बहुवचने ) .........

वानरः (तृतीया एकवचने) .........

कुम्भोदरः (द्वितीया एकवचने) ........

गजः (षष्ठी बहुवचने) .........

**4.-वाक्यशुद्धिं कारयत-**

(क) इमं देवदारु वृक्षं पुत्रवत् पालितवती।

(ख) तावत् अस्य गुहायां स्थितोऽस्मि ।

(ग) इयं गुरोः धेनुः मया निश्चयेन रक्षणीया।

(घ) इमां धेनंु त्यज।

**5-सन्धि-विच्छेदं कुरुत-**

पदम् सन्धि-विच्छेदः

यथा- रक्षणार्थम्त्र रक्षण+अर्थम्

ममार्थम्त्र ...........

उच्छिन्नम्त्र ..........

स्थितोऽस्मित्र ..........

**6.-म×जूषातः पदानि चित्वा वाक्यानि पूरयत-**

माता पुत्रवत् भवान् त्यज क्षतात्

(क) इमं देवदारुवृक्षं...................पालितवती।

(ख) गजस्य अनया दुष्कृत्या.................अतीव दुःखिता अभवत्।

(ग) .........................मां हन्तुं सर्मथः न भविष्यति।

(घ) ............................त्रायते इति क्षत्रियः।

(ड़) इमां धेनुं..........

**7- अधोलिखितपदानि प्रयुज्य वाक्यरचनां कुरुत-**

यथा- वृक्षः- अत्र एकः आम्र वृक्षः अस्ति।

सिंहः

राजा

सेवकः

ध्यातव्यम्ह

निष्यामि-हन् धातुनां लृटलकारे उत्तम पुरुषस्य एक वचने इंद रूपं भवति। एवमेव पठिष्यामि भविष्यामि, करिष्यामि, चेत्यादीनि रूपाणि लृटलकारे भवन्ति।

शिक्षण सङ्केतः-

छात्रैः विविध कार्यक्रमेषु अस्य नाटकस्य अभिनयं कारयत।

**एतदपि जानीत- रामायणे सप्तकाण्डानि-**

1. बालकाण्डम् 2. अयोध्याकाण्डम् 3. अरण्यकाण्डम् 4. किष्किन्धाकाण्डम् 5. सुन्दरकाण्डम् 6. युद्धकाण्डम् 7. उत्तरकाण्डम्

**रामायणं महाभारतं च आर्ष काव्य रूपेण ज्ञायेते।**


द्वादशः पाठः

# आदिकविः वाल्मीकिः



पुरा वाल्मीकिः नाम एकः ऋषिः आसीत्। एकदा सः शिष्यैः सह स्नातुं तमसानद्याः तीरम् अगच्छत्।

मार्गे सः व्याधेन विद्धम् एकं क्रौ□चपक्षिणमपश्यत्। सहचरस्य वियोगेन व्याकुलितायाः क्रौंच्याः उच्चैः क्रन्दनम् अशृणोत्। तत् श्रुत्वा तस्याः दयनीयां दशां दृष्ट्वा कारुणिकः ऋषिः द्रवितोऽभवत्। क्रौ□चीक्रन्दनात् जातः ऋषेः शोकः श्लोकरूपेण तस्य मुखात् एवं निरगच्छत्-मा निषाद

!

ऋषेः कवित्वं विज्ञाय ब्रह्मा आकाशवाण्या आदिशत्- "ऋषे! कुरु रामायणं काव्यम्। तत्र च रामचरितं वर्णय, येन रामस्य पुण्यं चरित्रं विदित्वा लोकाः सन्मार्गस्यानुसरणं कुर्युः।"

ब्रह्मणः आदेशानुसारेण वाल्मीकिना श्लोकबद्धा रामायणीकथा लिखिता। सैव वाल्मीकीयरामायणनाम्ना प्रसिद्धा।

अस्मिन् काव्ये वाल्मीकिना पितुः आज्ञापालनम् , भ्रातृस्नेहः, परोपकारः, दया, दाक्षिण्यम्, दीनरक्षा इत्यादीनि मानवतायाः पोषकानि जीवनमूल्यानि वर्णितानि सन्ति। अयं कविः संस्कृतस्य आदिकविः उच्यते तद्रचना च आदिकाव्यम् उच्यते।

शब्दार्थः

**व्याधेन** = बहेलिया द्वारा। **क्रौञ्चपक्षिणम्** = क्रौञ्च नामक पक्षी को। **उच्चैः** = जोर-जोर से। **क्रन्दनम्** = विलाप को, चीख़ को। **कारुणिकः** = दयालु। निषाद! = हे व्याध। **प्रतिष्ठाम्** = सम्मान। **ततः प्रभृति** = से लेकर। **विज्ञाय** = जानकर। **विदित्वा** = जानकर। **दाक्षिण्यम्** = उदारता, अनुकूलता। **जीवनमूल्यानि** = आदर्श जीवन के मूल्य।

अभ्यासः

**1. उच्चारणं कुरुत पुस्तिकायां च लिखत-**

तमसानद्याः व्याकुलितायाः का ́ चीक्रन्दनात्

यत्कौञ्चमिथुनादेकम् सन्मार्गस्यानुसरणम् दाक्षिण्यम्

**2. पूर्णवाक्येन उत्तरत-**

(क) वाल्मीकिः स्नातुं कुत्र अगच्छत् ?

(ख) किं श्रुत्वा किं दृष्ट्वा च ऋषिः द्रवितोऽभवत् ?

(ग) ब्रह्मा आकाशवाण्या वाल्मीकिं किम् आदिशत् ?

(घ) वाल्मीकिना श्लोकबद्धा का कथा लिखिता ?

(ङ) संस्कृतस्य आदिकविः कः ?

**3. निम्नलिखितपदानां विभक्तिं वचनं च लिखत-**

पदम् विभक्तिः वचनम्

शिष्यैः .................. ..................

नदीम् .................. ..................

जीवने .................. ..................

रामस्य .................. ..................

**4. निम्नलिखितपदेषु प्रयुक्तं उपसर्गं पृथक् कुरुत-**

पदम् उपसर्गः शब्दः

वियोगेन .................. ..................

अनुकरणम् .................. ..................

अपमानम् .................. ..................

आहारः .................. ..................

**5. संस्कृतभाषायाम् अनुवादं कुरुत-**

(क) सभी छात्र स्नान करने के लिए नदी के किनारे गये।

(ख) वाल्मीकीयरामायण में राम का चरित वर्णित है।

(ग) वाल्मीकि ऋषि ने क्रौञ्ची का रोना सुना।

(घ) ब्रह्मा ने वाल्मीकि को आदेश दिया।

(ङ) महापुरुषों के चरित्र का अनुसरण करो।

**6. म×जूषातः पदानि चित्वा वाक्यानि पूरयत -**

कविपदम् ऋषिः क्रा□चपक्षिणम् आदिकविः

(क) पुरा वाल्मीकिः नाम एकः............आसीत्।

(ख) व्याधेन विद्धम् एकं...............अपश्यत्।

(ग) ततः प्रभृति ऋषिरयं................प्राप्तः।

(घ) अयं कविः संस्कृतस्य ....................उच्यते।

**7. पदानि चित्वा कथां पूरयत-**

दुर्दान्तनामकः, मारयति स्म, बिडालकस्य, कृत्वा,

अनयत्, कर्तुम्, उपेक्षाम्, दुःखी, मूषकाः, समाप्ताः।

एकस्मिन् पर्वते...................... सिंहः निवसति स्म। सः मूषकैः पीडितः आसीत्। रात्रिकाले................तस्य केशान् कर्तयन्ति स्म। प्रातः सिंहः केशान् अधः दृष्ट्वा .............. भवति स्म। एकदा सः मूषकानाम् उपायम् ...... संकल्पम् अकरोत्। चिन्तामग्नः सः वने बिडालकम् अपश्यत्। बिडालकेन सह मित्रतां ................ स्वगुहां प्रति........... मूषकाः............भयेन विवरेषु केवलं शब्दं कुर्वन्ति स्म। यदा क्षुधापीडया मूषकाः बहिः आगच्छन्ति, तदा बिडालकः तान्..................। एवं शनैः-शनैः मूषकाः.............। स्वार्थे सिद्धे सिंहः विडालकस्य ............ अकरोत्। समाजे स्विार्थभिः सावधानाः भवेम।

शिक्षण-सङ्केतः

1. पाठस्य श्लोकार्थं लघुसमूहेषु लेखनस्य गतिविधिं कारयत।


2. कक्षायां पाठस्य वाचनं कारयत।

3. वाल्मीकिविषये दशवाक्यानि संस्कृतभाषायां लेखयत।

**<u>जीवितं यः स्वयं चेच्छेत् कथं सोऽन्यं प्रघातयेत्।</u>**

त्रयोदशः पाठः

# यक्षयुधिष्ठिर-संवादः



**यक्ष उवाच**

किंस्विद् गुरुतरं भूमेः किंस्विदुच्चतरं च खात्।

किंस्विच्छीघ्रतरं वायोः किंस्विद् बहुतरं तृणात्।।1 ।।

**युधिष्ठिर उवाच**

माता गुरुतरा भूमेः खात् पितोच्चतरस्तथा।

मनः शीघ्रतरं वाताच्चिन्ता बहुतरी तृणात्।।2।।

**यक्ष उवाच**

कः शत्रुर्दुर्जयः पुंसां कश्च व्याधिरनन्तकः।

कीदृशश्च स्मृतः साधुरसाधुः कीदृशः स्मृतः।।3।।

**युधिष्ठिर उवाच**

क्रोधः सुदुर्जयः शत्रुर्लोभो व्याधिरनन्तकः।

सर्वभूतहितः साधुरसाधुर्निर्दयः स्मृतः ।।4।।

शब्दार्थः

**किंस्वित्** = कौन। **खात्** = आकाश से। **बहुतरम्** = अपेक्षाकृत अधिक। **प्रवसतः** = परदेश में रहने वाले का। **आतुरस्य** = रोगी का। **दुर्जयः** = कठिनाई से जीतने योग्य। **पुंसाम्** = मनुष्यों का। **अनन्तकः** = कभी अन्त न होने वाला। **सर्वभूतहितः** = सभी प्राणियों का हित करने वाला।अभ्यासः

**1. उच्चारणं कुरुत पुस्तिकायां च लिखत-**

किंस्विदुच्चतरम् किंस्विच्छीघ्रतरम् पितोच्चतरस्तथा वाताच्चिन्ता

शत्रुर्दुर्जयः व्याधिरनन्तकः साधुरसाधुनिर्दयः

**2. अधोलिखितान् यक्षस्य प्रश्नान् युधिष्ठिरस्य च उत्तराणि पठित्वा मननं कुरुत-**

**यक्षस्य प्रश्नानि यधिरिष्ठरस्य उत्तराणि**

1. भूमेः गुरुतरं किंस्वित् ? 1. भूमेः गुरुतरा माता।

2. खात् उच्चतरं च किंस्वित् ? 2. पिता खात् उच्चतरः।

3. वायोः शीघ्रतरं किंस्वित् ? 3. वातात् शीघ्रतरं मनः।

4. तृणात् बहुतरं किंस्वित् ? 4. तृणात् बहुतरी चिन्ता।

5. पुंसां दुर्जयः शत्रुः कः ? 5. (पुंसाम्) दुर्जयः शत्रुः क्रोधः।

6. (पुंसाम्) अनन्तकः व्याधिः कः ? 6. (पुंसाम्) अनन्तकः व्याधिः लोभः।

7. साधुः कीदृशः स्मृतः ? 7. सर्वभूतहितः साधुः स्मृतः।

8. असाधुः कीदृशः स्मृतः ? 8. निर्दयः असाधुः स्मृतः।

**ध्यातव्यम्**

भूमःे गुरुतरा माता (भूमि की अपेक्षा माता महान् है) अपेक्षाशब्देन कृतायां तुलनायां पञ्चमी विभक्तिः

भवति। तरप् (तर)-प्रत्ययान्तशब्दाः विशेषणरूपे प्रयुक्ताः भवन्ति, यथा- उच्चतरम्, महत्तरम्,

पटुतरम् इत्यादयः।

**3. संस्कृतभाषायाम् अनुवादं कुरुत -**

(क) देवदत्त प्रभाकर की अपेक्षा चतुर है।

(ख) यह मिठाई उस मिठाई से मधुर है।

(ग) विन्ध्याचल से हिमालय ऊँचा है।

(घ) ज्ञान से आचरण श्रेष्ठ है।

(ङ) नीम से नारियल बड़ा है।

**4. उपयुक्तकथनानां समक्षम् 'आम्' अनुपयुक्तकथनानां समक्षम् 'न' इति लिखत -**

(क) माता भूमेः गुरुतरा अस्ति। ...............................

(ख) मनः वातात् शीघ्रतरं न। ...............................

(ग) आतुरस्य धनं मित्रम्। ...............................

(घ) दुर्जयः शत्रुः क्रोधः ..............................

(ङ) निर्दयः असाधुः स्मृतः। ..............................

**5- अधोलिखितपदानि प्रयुज्य वाक्यरचनां कुरुत-**

यथा- उवाच यक्षः युधिष्ठिरम् उवाचः।

कीदृशः, माता, क्रोधः

**6-निम्नलिखितपदानां विलोमपदं लिखत-**

यथा- गुरुतरम् - लघुतरम्

मूर्ख, नास्तिकः, शत्रुः, साधुः।

**7-रेखांकितपदानि अधिकृत्य प्रश्ननिर्माणं कुरुत-**

यथा-भूमेः गुरुतरा माता। भूमेः गुरुतरा का ?

(क) पिता खात् उच्चतरः।

(ख) निर्दयः असाधुः स्मृतः।


(ग) सर्वभूतहितः साधुः स्मृतः।

**शिक्षण-सङ्केतः-**

1. शिक्षकः अस्मिन् संदर्भे सन्दर्शिकायाः अवलोकनं कुर्यात्।

2. महाभारते आगतस्य यक्ष-युधिष्ठिर-संवादस्य चर्चां कुर्यात्।

**वदतु संस्कृतम्-**



**खेलितंु मित्रेण सह अनुरोधः**

**किशोरः** कौशल! खेलितुं चलिष्यसि ?

**कौशलः** अवश्यं चलिष्यामि।

**किशोरः** आम्, खेलने तु तव मन एव लगति। तर्हि आगच्छ।

**कौशलः** चलामि जलपानं कृत्वा। आगच्छ, किं □चत् त्वमपि जलपानं कुरु।

**किशोरः** अहन्तु इदानीम् एव कृत्वा आगच्छामि।

**कौशलः** अस्तु, अहमपि सज्ज एव जातः। इदानीं चलितव्यम्। कन्दुकं वर्तते ?

**किशोरः** कन्दुकं तु मम वर्तते परं वायुः निर्गतः अस्ति। त्वं आत्मनः कन्दुकं गृहाण।

**कौशलः** कथं वायुः निर्गतः ?

**किशोरः** गतदिने खेलनकाले एकेन कण्टकेन कन्दुकम् अपविद्धम्।

**कौशलः** अस्तु, तर्हि अवश्यमेव आनयामि। परं कदाचित् इदमपि अपविद्धं न जायेत।

**किशोरः** नहि, अद्य कण्टकानि अपनीय खेलिष्यामः।

**कौशलः** तदा शोभनं भविष्यति। चलतु। अहं कन्दुकं गृहीत्वा अनुपदमेव आगच्छामि।

विशेषः- संस्कृते सम्भाषण-कौशलस्य विकासाय उपयुक्त-पुस्तकानाम् उपयोगं कारयत।

## चतुर्दशः पाठः

# वीराङ्गना विश्पला

CU536L



वैदिकयुगे कश्चित् 'खेलः' इति नाम्ना प्रसिद्धः राजा आसीत्। सः क्रीडायाम् अतीव कुशलः आसीत्, अतएव तस्य नाम 'खेलः' इति अभवत्।

तस्य पत्नी अतीव युद्धनिपुणा वीराङ्गना आसीत्, यस्या नाम 'विश्पला' इति आसीत्। एकस्मिन् युद्धे सा युद्धं कुर्वती शत्रुभिः परिवेष्टिता अभवत्, तस्याः द्वौ अपि पादौ छिन्नौ, सा विकलाङ्गी अभवत्, परन्तु वीराङ्गना विश्पला हतोत्साहा न अभवत्, तस्याः साहसं वीरताम् उत्साहं च दृष्ट्वा खेलराजस्य मार्गनिर्देशकः अगस्त्यः तस्याम् एव रात्रौ देवचिकित्सकौ अश्विनीकुमारौ आहूतवान्। तौ विश्पलायै लौहनिर्मितौ पादौ अकल्पयताम्। सा च वीराङ्गना ततः अतीवोत्साहयुक्ता शत्रुभिः निहितं धनं जितवती। इत्थं पूर्वं दिव्याङ्गीं अपि विश्पला वीराङ्गना लौहपादसाहाय्येन शत्रून् जित्वा तदीयं धनम् आहृतवती। अत एवोक्तम् -" क्रियासिद्धिः सत्वे भवति महतां नोपकरणे।" इति।

## शब्दार्थः

**वीराङ्गना** = वीर स्त्री। **कुर्वन्ती** = करती हुई। **परिवेष्टिता जाता** = घेर ली गयी। **छिन्नौ** = कट गये। **हतोत्साहा** = उत्साह रहित। **आहूतवान्** = बुलाया। **अकल्पयताम्** = जोड़ दिया, बना दिया। **निहितम्** = जमा किया हुआ। **इत्थम्** = इस प्रकार। **आहृतवती** = ले ली। **अत**

**एवोक्तम्** = (अत एव+उक्तम्) इसलिए कहा गया है। **सत्त्वे** = पराक्रम में। **उपकरणे** = साधन में।

अभ्यासः

**1. उच्चारणं कुरुत पुस्तिकायां च लिखत-**

कश्चित् विशेषज्ञश्च वीराङ्गना विश्पला लौहनिर्मितौ अकल्पयताम् लौहपादसाहाय्येन परिवेष्टिता

**2. पूर्णवाक्येन उत्तरत -**

(क) विश्पला का आसीत् ?

(ख) सा कस्य पत्नी आसीत् ?

(ग) अगस्त्यः किम् अकरोत् ?

(घ) युद्धे तस्याः किम् अभवत् ?

(ङ) उत्साहयुक्ता विश्पला किम् अकरोत् ?

**3. सन्धि-विच्छेदं कुरुत-**

पदम् सन्धि-विच्छेदः

वीराङ्गना .........................

विकलाङ्गी .........................

नोपकरणे .........................

**4. पाठस्य आधारे वाक्यानि पूरयत -**

(क) वैदिक युगे कश्चित् ..................... राजा आसीत्।

(ख) तस्य पत्नी.......... वीराङ्गना आसीत्।

(ग) एकस्मिन् युद्धे सा ......................... शत्रुभिः परिवेष्टिता जाता ।

(घ) वीराङ्गना विश्पला .................. न जाता ।

**5. निम्नलिखितपदेषु विभक्तिं वचनं च लिखत -**

विभक्तिः वचनम्

यथा- वैदिकयुगे सप्तमी एकवचन

(क) क्रीडायाम् ............. .................

(ख) तस्य ............. .................

(ग) शत्रुभिः .............. ................

(घ) पादौ ................. ...............

**6. संस्कृतभाषायाम् अनुवादं कुरुत -**

(क) विश्पला एक बार युद्ध में शत्रुओं के द्वारा घेर ली गयी।

(ख) अश्विनीकुमारों ने लोहे के पैर लगा दिये।

(ग) उसने पुनः युद्ध किया तथा शत्रुओं को जीत लिया।

**<u>कुछ कपड़ों के संस्कृत नाम-</u>**

हिन्दी संस्कृत

**धोती** धौतवस्त्रम्

**साड़ी** शाटिका

**अँगौछी** (तौलिया) अङ्गप्रोक्षणी

**कमीज** कञ्चुकः

**हाफकमीज** अर्धकञ्चुकः

**चद्दर** उत्तरीयम्

**गद्दा** तूलिका/तोशकः

**रूमाल** कर्पटः

**पगड़ी** उष्णीषः

**टोपी** टोपिका

**बिछौना** आस्तरणम्

**तकिया** उपधानम्

**रजाई** तूलपटी

**गद्दी** मर्दिका

## पञ्चदशः पाठः

# संस्कृतम्



भारतीयैकता-साधकं संस्कृतम्

भारतीयत्व-सम्पादकं संस्कृतम्

ज्ञान-पुञ्ज - प्रभादर्शकं संस्कृतम्

सर्वदानन्द-सन्दोहदं संस्कृतम्।।1 ।।

विश्वबन्धुत्व-विस्तारकं संस्कृतम्

सर्वभूतैकता-कारकं संस्कृतम्

सर्वतः शान्तिसंस्थापकं संस्कृतम्

पञ्चशील- प्रतिष्ठापकं संस्कृतम्।।2।।

त्याग-सन्तोष-सेवा-व्रतं संस्कृतम्

विश्वकल्याण-निष्ठायुतं संस्कृतम्

ज्ञान - विज्ञान - सम्मेलनं संस्कृतम्

भुक्ति-मुक्ति-द्वयोद्भावनं संस्कृतम्।।3।।

नगरे-नगरे ग्रामे-ग्रामे विलसतु संस्कृत-वाणी।

सदने-सदने जन-जनवदने जयतु चिरं कल्याणी। ।4।।

शब्दार्थः

**भारतीयैकता-साधकम्** = भारतीय एकता को सिद्ध करने वाला। **भारतीयत्व-सम्पादकम्** = भारतीयता की भावना का सम्पोषक। **ज्ञानपु×जप्रभादर्शकम्** = ज्ञान-समूह के प्रकाश को दिखलाने वाला। **आनन्दसन्दोहदम्** = आनन्द समूह को देने वाला। **सर्वभूतैकता** = सभी प्राणियों के प्रति ऐक्यभावना। **सर्वतः** = चारों ओर। **शान्तिसंस्थापकम्** = शान्ति की स्थापना करने वाला। **पञ्चशीलप्रतिष्ठापकम्** = प×चशील के सिद्धान्तों की प्रतिष्ठा करने वाला। **त्यागसन्तोषसेवाव्रतम्** = त्याग, सन्तोष और सेवा व्रत वाली। **विश्वकल्याणनिष्ठायुतम्** = विश्व की भलाई की निष्ठा से युक्त। **भुक्तिमुक्तिद्वयोद्भावनम्** = भोग और मोक्ष दोनों की उद्भावना (उत्पत्ति) करने वाली। **सदने** = घर में। **चिरम्** = बहुत समय तक (सदा)। **कल्याणी** = कल्याण करने वाली।

अभ्यासः

**1. उच्चारणं कुरुत पुस्तिकायां च लिखत-**

भारतीयैकता भारतीयत्वम् सन्दोहदम्

विश्वबन्धुत्वम् सर्वभूतैकता प्रतिष्ठापकम्

**2. पूर्णवाक्येन उत्तरत -**

(क) संस्कृतं कस्य साधकम् अस्ति ? (ख) संस्कृतं कस्य विस्तारकम् अस्ति ?

(ग) संस्कृतं कयोः सम्मेलनम् अस्ति ?

(घ) भुक्तिमुक्तिद्वयोद्भावनं किम् अस्ति ?

(ङ) कल्याणी का अस्ति ?

**3. हिन्दीभाषायाम् अनुवादं कुरुत -**

(क) पञ्चशीलप्रतिष्ठापकं संस्कृतम् ।

(ख) नगरे-नगरे, ग्रामे-ग्रामे विलसतु संस्कृत-वाणी।

(ग) विश्ववन्धुत्व-विस्तारकं संस्कृतम्।

ध्यातव्यम्-

विशेष्ये यत् लिङ्गम्, या विभक्तिः, यत् वचनं च भवति, विशेषणेऽपि तत् लिङ्गम्, सा विभक्तिः

तत् वचनं च भवति, यथा- शोभनः छात्रः (पु0), शोभना छात्रा (स्त्री), शोभनं पुस्तकम् (नपु0)।

**4. पाठे आगतानि विशेष्य-विशेषणपदानि लिखत -**

यथा- साधकं संस्कृतम्।

**5. विशेष्यपदानां पूर्वम् उपयुक्तविशेषणपदं लिखत-**

(क) ............. पुष्पम्। (सुन्दरः, सुन्दरम्।)

(ख) ................ चित्रम्। (मनोहरम्, मनोहारी।)

(ग) .................कमले। (सुन्दरे, सुन्दराः।)

(घ) ....................वस्त्राणि। (स्वच्छः, स्वच्छानि।)

**6. संस्कृतभाषायाम् अनुवादं कुरुत -**

(क) संस्कृत विश्वबन्धुत्व को फैलाने वाली है।

(ख) संस्कृत चारों ओर शान्ति की स्थापना करने वाली है।

(ग) संस्कृत ज्ञान-विज्ञान का मेल कराने वाली है।

**7. म˝ जूषातः पदानि चित्वा वाक्यानि पूरयत -**

संदोहदम्, विलसतु, संस्कृतम्, जयतु।

(क) ज्ञानपुञ्ज-प्रभादर्शकम्....................................।

(ख) नगरे-नगरे, ग्रामे-ग्रामे ................................ संस्कृतवाणी।

(ग) सदने-सदने, जन-जनवदने ........................ चिरं कल्याणी।

(घ) सर्वदानन्द.......................................संस्कृतम्।

शिक्षण-सङ्केतः

1. प˝ चशीलसिद्धान्तस्य विषये छात्रान् बोधयत।

2. श्लोकानां सामूहिकं सस्वरगानं कार

हास्यं सुद्ध्युपास्यम् (चुटकुला)



एकः बाबू होतले गत्वा-वेतर वेतर इति अवदत्। वेतरः-(आगत्य) बाबू महोदय! बाबू-तव होतले किं किमस्ति ? शीघ्रम् आनय क्षुधा

बाधते। वेतरः (केषा चत् वस्तूनां मूल्यं संयुज्य देयकपत्रं करोति) गृह्णातु बाबू 110 रूप्यकाणां देयकपत्रं अस्ति। रूप्यकाणि यच्छतु।

बाबू- अरे देयकपत्रं तु भोजनस्य पश्चात् दीयते त्वं प्रागेव यच्छसि। वेतरः -वार्ता एषा अस्ति यद् ह्यः एकः बाबू भुक्त्वा एव मृतः। तस्य

देयं मयैव दत्तम्। अतः अहं प्रथममेव रुप्यकाणि गृह्णामि।

**भावार्थ-** एक बाबू जी होटल में जाकर- वेटर वेटर पुकारने लगे। वेटर (आकर)- जी बाबू जी। बाबू- तुम्हारे होटल में क्या-क्या है। जल्दी लाओ भूख लगी है। वेटर (कुछ वस्तुओं का मूल्य गिनकर बिल बनाता है) लीजिए बाबू जी 110 रुपये का बिल है, रुपये दीजिए। बाबू- अरे बिल तो बाद में दिया जाता है, तुम पहले क्यों माँग रहे हो? वेटर- बात यह है कि कल एक बाबू खाते ही मर गया था और उसका बिल मुझे भरना पड़ा। (आज मैं जोखिम नहीं ले सकता।) इसलिए मैं पहले ही रुपये ले रहा हूँ।

**7. म जूषातः पदानि चित्वा वाक्यानि पूरयत -**

संदोहदम्, विलसतु, संस्कृतम्, जयतु।

(क) ज्ञानपुञ्ज-प्रभादर्शकम् .................................... ।

(ख) नगरे-नगरे, ग्रामे-ग्रामे ................................ संस्कृतवाणी।

(ग) सदने-सदने, जन-जनवदने ........................ चिरं कल्याणी।

षोडशः पाठः

# विश्वबन्धुत्वम्

विश्वस्य सर्वान् जनान् प्रति बन्धुतायाः भावः विश्वबन्धुत्वम् इति कथ्यते। शान्तिमयाय जीवनाय विश्वबन्धुत्वस्य भावना महत्त्वं भजते। सर्वजनहितं सर्वजनसुखं च बन्धुत्वं विना न सम्भवति। विश्वबन्धुत्वम् अधिकृत्य केनापि मनीषिणा निर्दिष्टम्-

**अयं निजः परो वेति गणना लघुचेतसाम्।**

**उदारचरितानां तु वसुधैव कुटुम्बकम्।।**

साम्प्रतम् जगति सर्वत्र कलहस्य अशान्तेः च साम्राज्यं व्याप्तम् अस्त्।ि येन साधनसम्पन्नः अपि मानवः सुखस्य स्थाने दुःखम् एव अनुभवति। यद्यपि ज्ञानबलेन मानवः इदानीं वायुयानेन आकाशे विचरितुं, जलपोतेन सागरान् सन्तर्तुं, रेलयानेन विश्वभ्रमणं कर्तुं ग्रहयानेन चन्द्रादिग्रहेषु च गन्तुं समर्थः अस्ति, तथापि परस्परं सम्बन्धानां कटुतया स अशान्तः एव दृश्यते, कष्टं च अनुभवति। अस्य प्रधानं कारणं बन्धुतायाः अभावः एव।

विगतयोः द्वयोः विश्वयुद्धयोः विनाशलीलां सर्वे जानन्ति एव। इदानीं तृतीयस्य युद्धस्य सम्भावना मानवजातिम् आक्रान्तां करोति, येन विश्वस्य भयंकरो नाशो भवितुं शक्नोति। अतः आवश्यकता अस्ति यत् मानवः मानवं प्रति बन्धुवत् आचरणं कुर्यात्। एकः देशः अन्येन देशेन सह बन्धुतायाः व्यवहारं कुर्यात्। सबलाः देशाः दुर्बलानां देशानाम् उपरि आक्रमणं न कुर्युः। स्वार्थस्य लोलुपतायाः महत्त्वाकाङ्क्षायाः च स्थाने परोपकारस्य, दयायाः, त्यागस्य, परस्परं सहयोगस्य च प्रसारो भवेत्।

यद्यपि शान्तिस्थापनार्थं संयुक्तराष्ट्रसंघः, निर्गुटान्दोलनम्, अन्यानि संघटनानि च सततं प्रयत्नं कुर्वन्ति, तथापि स्वार्थस्य, अहंकारस्य, शक्तिवर्धनस्य च दूषितेन भावेन भ्रान्ताः केचिद् देशाः संघर्षरताः सन्ति, विरोधः येन अशान्ति वर्धते। अनेन मानवः एव मानवहन्ता स×जातः। सर्वत्र प्रेम्णः बन्धुतायाः च अभावो वर्तते, याभ्यां विना शान्तिः जीवने दुर्लभा जाता।

संसारे सर्वेषु मानवेषु समानं रक्तं प्रवहति, सर्वेषां च नियन्तैकः एव अस्ति। एतत्सर्वं जानन्तः अपि जनाः स्वार्थपरायणतया परस्परं कलहं कुर्वन्ति। अस्य मूलं कारणं विश्वबन्धुतायाः अभाव एव अस्ति। अत एव सर्वेषु विश्वबन्धुत्वस्य भावना नितान्तम् अपेक्षिता वर्तते। विश्वबन्धुत्वे इयमेव भावना सन्निहिता विद्यते-

**“सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः।**

**सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखभाग् भवेत्।।”**

**शब्दार्थः**

**नितराम्** = पूरी तरह से। **अपरिहार्या** = अनिवार्य। **सम्भवति** = सम्भव हो सकता है। **मनीषिणा** = विद्वानों से। **परो वेति** = (परः वा इति) अथवा दूसरे का है ऐसा मानना। **लघुचेतसाम्** = छोटे हृदय वालों का। **आक्रान्ताम्** = भयभीत। **नियन्तैकः** = (नियन्ता+एकः) नियन्ता एक है। **साम्प्रतम्** = इस समय। **सन्तर्तुम्** = पार करने के लिए। **भ्रान्ताः** = भटके हुए। **हन्ता** = मारने वाला। **सञ्जातः** = हो गया। **निरामयाः** = रोगरहित। **भद्राणि** = कल्याण। **प्रेम्णः** = प्रेम का। **नितान्तम्** = अतिशय, अत्यधिक।

**अभ्यासः**

**1-एकपदेन उत्तरत**

(क) वसुधैव कुटुम्बकम् केषां मते भवति ?

(ख) मानवः मानवं प्रति कीदृशम् आचरणं कुर्यात् ?

(ग) एकः देशः अन्येन देशेन सह कीदृशं व्यवहारं कुर्यात् ?

(घ) सर्वेषु मानवेषु समानं किं प्रवहति ?

(ङ) जनाः परस्परं कलहं किमर्थं कुर्वन्ति ?

**2. पूर्णवाक्येन उत्तरत -**

(क) बन्धुत्वं विना किं न सम्भवति ?

(ख) संयुक्तराष्ट्रः कीदृशं प्रयत्नं करोति ?

(ग) कीदृशी भावना नितान्तम् अपेक्षिता वर्तते ?

(घ) सर्वेषां नियन्ता कः ?

**3. विभक्तिं वचनं च लिखत -**

पदम् विभक्तिः वचनम्

कलहस्य .................... ....................

अखिलान् .................... ....................

जनान् .................... ....................

रेलयानेन .................... ....................

**4. सन्धि-विच्छेदं कुरुत -**

पदम् सन्धि-विच्छेदः

केनापि ...................................

तदैव ...................................

वेति ...................................

वसुधैव ...................................

समस्यैका ...................................

**5. मञ्जूषातः पदानि चित्वा वाक्यानि पूरयत -**

(क) ज्ञानबलेन मानवाः इदानीं वायुयानेन ................. विचरितुं समर्थाः।

(ख) विगतयोः द्वयोः .................... विनाशलीलां सर्वे जानन्ति एव।

(ग) उदारचरितानां तु .................. कुटुम्बकम्।

(घ) अशान्तस्य च कदापि सुखं न ................ ।

**6. संस्कृतभाषायाम् अनुवादं कुरुत -**

(क) एक देश दूसरे देश के साथ बन्धुता का व्यवहार करें।

(ख) विश्वबन्धुत्व ही सुख का एकमात्र कारण है।

(ग) सभी मनुष्यों का हृदय विशाल हो।

(घ) सभी मनुष्य सुखी रहें।

(ङ) उदार चरित्र वालों के लिए पृथ्वी ही परिवार है।

**7. निम्नलिखितशब्दानां लघुवाक्येषु प्रयोगं कुरुत-**

यथा- मानवः- मानवः दुःखम् एव अनुभवति।

संसारे-

सर्वेषु-

बन्धुवत्-

शिक्षण-सङ्केतः

**वसुधैव विश्वयुद्धयोः आकाशे भवति**

**विश्वबन्धुत्वस्य महत्त्वे चर्चां कारयत।**

सप्तदशः पाठः

# समाज निर्माणे नारीणां भूमिका

CV6LD7



वैदिकवाङ्मये अपाला - घोषा - लोपामुद्रा -प्रभृतयः विदुष्यः नार्यः अभवन्। गार्गी ब्रह्मवादिनी, तीक्ष्णबुद्धिः अध्यात्मतत्त्वस्य विवेचिका आसीत् सा याज्ञवल्क्येन सह शास्त्रार्थमकरोत् तथा याज्ञवल्क्यं निरुत्तरम् अकरोत्। याज्ञवल्क्यपत्नी मैत्रेयी अपि प्रज्ञावती सूक्ष्मविवेचिका चासीत्। आचार्यमण्डनमिश्रस्य पत्नी भारती अतीव विदुषी साक्षात् सरस्वत्यवतारभूता आसीत्। तस्याः वैशिष्ट्यमिदं यत् आचार्यशङ्करेण सह सा

मण्डनमिश्रस्य शास्त्रार्थे निर्णायिकाऽभवत्। यदा मण्डनमिश्रः पराजितोऽभवत् तदा स्वयमपि सा शास्त्रार्थं शङ्करेण सह कृतवती।

आधुनिके काले-विमानचालने, चन्द्रगमने, जलयानचालने महिलाः अग्रेसरन्ति। पुरुषवत् स्त्रियः अपि सार्वजनिकराजकीयसेवासु संलग्नाः दृश्यन्ते। व्यापारे, आपणेष्वपि तासां संख्या पुरुषापेक्षया न्यूना नास्ति। सम्प्रति राजनीतौ अपि स्त्रियः पुरुषैः सार्धं सहयोगितया प्रगतिं कुर्वन्ति। ताः पार्षदविधायक-सांसदेत्यादीनि पदानि चालंकुर्वन्ति। भाषणेऽपि तासाम् ओजस्विता अवलोक्यते। किं बहुना, राष्ट्रपति - प्रधानमन्त्रि - मन्त्रि - प्रभृतीनि महत्त्वपूर्णानि पदानि भूषयन्त्यः गौरवं लभन्ते। क्रिकेट - बालीबाल - टेनिसेत्यादिषु पाश्चात्यक्रीडाक्षेत्रेष्वपि नवाः युवतयः बालिकाश्च देशान्तरेषु गत्वा विजयं प्राप्य जगति भारतस्य मानं वर्धयन्ति। आधुनिक समये तु कबड्डीभारोत्तोलनसदृशीषु भारतीयक्रीडास्वपि ताः स्पर्धन्ते। सम्पन्नायाम् ओलम्पिकक्रीडाप्रतिस्पर्धायां भारोत्तोलने कर्णममल्लेश्वरी पदकं प्राप्तवती। शिक्षाक्षेत्रेऽपि युवतयः प्राध्यापकाचार्यपदेषु प्रतिष्ठिताः सन्ति। केवलं न कुलपतिपदं प्रत्युत मन्त्रिपदमपि ताः भूषयन्ति। एवं हि नार्यः समाजस्य सर्वेषु कर्मक्षेत्रेषु महत्त्वपूर्ण योगदानं कुर्वाणाः राष्ट्रस्य अभ्युन्नतौ संलग्नाः सन्ति।

शब्दार्थः

**ब्रह्मवादिनी** = ब्रह्मविषयक ज्ञान में निष्णात। **परमतत्त्वचिन्तने** = अध्यात्म तत्त्व के चिन्तन में। **प्रज्ञावती** = बुद्धिमती। **दक्षा** = समर्थ। **समकक्षताम्** = समानता को। **आपणेषु** = दुकानों मंे। **सहयोगितया** = (सहयोगी के रूप में) कंधे से कंधा मिलाकर। **भूषयन्तः** = शोभित करती हुई। **पुष्णाति** = पुष्ट करता है। **सरस्वत्यवतारभूता** = (सरस्वति$अवतारभूता) सरस्वती का अवतार। **अग्रेसरन्ति** = आगे चलती हैं। **आपणेष्वपि** = (आपणेषु+अपि) बाजारों में भी। **सांसदेत्यादीनि** = (सांसद+इत्यादीनि) सांसद इत्यादि। **अभ्युन्नत**= अधिक ऊँचा।

**1. उच्चारणं कुरुत पुस्तिकायां च लिखत-**

विदुष्यः तीक्ष्णबुद्धिः अध्यात्मतत्त्वस्य सरस्वत्यवतारभूतः वैशिष्ट्यमिदम् कबड्डीभारोत्तोलनसदृशीषु ओलम्पिकक्रीडा-प्रतिस्पर्धायाम्

**2. पूर्णवाक्येन उत्तरत -**

(क) समाजस्य निर्माणे कासां महती भूमिका स्वीक्रियन्ते ?

(ख) समाजस्य कल्याणं कदा भवति ?

(ग) प्राचीनकाले अस्माकं देशे काः विदुष्यः आसन् ?

(घ) विदुष्यः नाय्र्यः काः ?

(ङ) गार्गी केन सह शास्त्रार्थमकरोत् ?

(च) मैत्रेयी कीदृशी आसीत् ?

(छ) आधुनिके समाजे स्त्रियः केषु क्षेत्रेषु स्वीकायं योगदानं कुर्वाणाः दृश्यन्ते ?

**3. पदेषु सन्धि-विच्छेदं कुरुत -**

पदम् सन्धि-विच्छेदः

तथैव ............................................

चन्द्रोपरि ............................................

क्षेत्रेऽपि ............................................

शास्त्रार्थे ............................................

अभ्यासः

**4. निम्नलिखितपदेषु उपसर्गं लिखत -**

पदम् उपसर्गः

विजयम् .....................

संलग्नः .....................

प्रचलितः .....................

प्राध्यापकः .....................

**5. मञ्जूषातः पदानि चित्वा वाक्यानि पूरयत -**

(क) वैदिक वाङ् मये नार्यः............................ अभवन्।

(ख) साम्प्रतं मनुष्याणां............................. परिवर्तिता।

(ग) मण्डनमिश्रस्य पत्नी ......... अतीव विदुषी आसीत्।

(घ) भारोत्तोलने............ पदं प्राप्तवती।

**6. संस्कृतभाषायाम् अनुवादं कुरुत -**

(क) समाज में स्त्री और पुरुष का महत्त्व समान है।

(ख) स्त्री और पुरुष की समानता की भावना प्राचीनकाल से है।

(ग) वह युद्ध तथा यज्ञों में भी भाग लेती थी।

(घ) माता बच्चों की प्रथम शिक्षिका होती हैं।

(ङ) इस समय भारतीय राजनीति में महिलाओं की महती भूमिका है।

**7. 'मम माता' इति विषये संस्कृतभाषायां प×च वाक्यानि लिखत।**

शिक्षण-सङ्केतः

स्त्रीपुरुषयोः समानतायाः स्वरूपं छात्रान् स्पष्टं कारयत।

विदुष्यः, कर्णममल्लेश्वरी, भारती, जीवनदृष्टिः।

यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः।

**पुनरावृत्तिः**

**1. दीर्घस्वराः के-के सन्ति, इति लिखत।**

**2. संयुक्तव्यञ्जनानां पञ्च उदाहरणानि लिखत।**

**3. निम्नलिखित-वर्णानाम् उच्चारणस्थानानि लिखत-**

ई, ण, ए, ब, व।

**4. अक्' प्रत्याहारे 'एङ्' प्रत्याहारे च के के वर्णाः भवन्ति, इति लिखत।**

**5. 'श', 'ष' स' चैतेषाम् उच्चारणस्थानानि वदत।**

**6. निम्नलिखितपदेषु सन्धि-विच्छेदं कृत्वा सन्धिनाम लिखत**

पदम् सन्धि-विच्छेदः सन्धि-नाम

सूक्तिः .................

औषधालयः ............

तथापि ..................

सूर्योदयः ..................

**7. निर्देशानुसारेण शब्दरूपाणि लिखत -**

शब्दः रूपम्

'राम' शब्दस्य तृतीयाविभक्तेः बहुवचने .....................

'रमा' शब्दस्य षष्ठीविभक्तेः एकवचने .....................

'पुस्तक' शब्दस्य सप्तमीविभक्तेः बहुवचने .....................

'नदी' शब्दस्य षष्ठीविभक्तेः एकवचने .....................

**8. शुद्धेषु उत्तरेषु ( च् ) चिह्नं योजयत्-**

(क) कारकाणि सन्ति। (षट्/सप्त/अष्ट)

(ख) विभक्तयः सन्ति। (षट्/सप्त/अष्ट)

(ग) त्वं पठसि। (पुस्तकम्/पुस्तकस्य)

(घ) सीता फलं खादति। (मधुरः/मधुरम्)

व्याकरणम्

सन्धिः

CVFHEU

## वृद्धि-सन्धिः '

वृद्धिरेचि-(1) अ या आ के बाद ए या ऐ हो तो दोनों के स्थान पर 'ऐ' होगा।

(2) अ या आ के बाद ओ या औ हो तो दोनों के स्थान पर 'औ' होगा।

यथा- (अ+ए= ऐ) अत्र+एव = अत्रैव

(आ+ए= ऐ) तथा+एव = तथैव

(अ+ऐ =ऐ) जन+ऐक्यम् = जनैक्यम्

(आ+ऐ =ऐ) महा+ ऐश्वर्यम् = महैश्वर्यम्

(अ+ओ =औ) जल+ओघः = जलौघः, (जल की धारा)।

(आ$ओ =औ) महा$ओषधिः = महौषधिः

(अ+औ =औ) जन+औत्सुक्क्यम् = जनौत्सुक्यम

(आ+औ=औ) महा+औत्सुक्यम् = महौत्सुक्यम्

## यण्-सन्धिः

'इको यणचि' - इ या ई के बाद कोई भिन्न स्वर हो तो इ/ई के स्थान में य् हो जाता है।

उ या ऊ के बाद कोई भिन्न स्वर हो तो उ/ऊ के स्थान पर व् हो जाता है।

ऋ के बाद कोई भिन्न स्वर हो तो ऋ के स्थान पर र् हो जाता है।

लृ के बाद कोई भिन्न स्वर हो तो लृ के स्थान पर ल् हो जाता है।

प्रति +एकम् = प्रत्येकम् सु +आगतम् = स्वागतम्

प्रति + अक्षम् = प्रत्यक्षम् मधु +अरिः = मध्वरिः

परि+ आवरणम् = पर्यावरणम् अनु + एषणम् = अन्वेषणम्

पितृ + आदेशः = पित्रादेशः लृ +अकारः = लकारः

मातृ + ए = मात्रे लृ +आकृतिः = लाकृतिः

## अयादि-सन्धिः

'एचोऽयवायावः'- ए को अय्, ओ को अव्, ऐ को आय् औ को आव् हो जाता है, बाद में कोई स्वर हो तो।

ने + अनम् = नयनम् पो + अनः = पवनः

शे + अनम् = शयनम् भो + अनम् = भवनम्

सञ्चे +अः = सचयः भो +अति = भवति

चे + अनम् = चयनम्

गै + अकः = गायकः पौ + अकः = पावकः

नै + अकः = नायकः नौ + इकः = नाविकः

भौ + उकः = भावुकः

**शब्दरूपाणि**

संज्ञा-शब्दाः

**पुंल्लिङ्गम्**

## तकारान्तः पंुल्लिङ्गः 'महत्' शब्दः

| **विभक्तिः** | ***एकवचनम्*** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमा** | महान् | महन्तौ | महन्तः |
| **द्वितीया** | महन्तम् | महन्तौ | महतः |
| **तृतीया** | महता | महद्भ्याम् | महद्भिः |
| **चतुर्थी** | महते | महद्भ्याम् | महद्भ्यः |
| **प×चमी** | महतः | महद्भ्याम् | महद्भ्यः |
| **षष्ठी** | महतः | महतोः | महताम् |
| **सप्तमी** | महति | महतोः | महत्सु |
| **सम्बोधनम्** | हे महन् | हे महन्तौ | हे महन्तः |

## तकारान्त नपुंसकलिङ्गम् 'भवत्'

विभक्तिः एकवचनम् द्विवचनम् बहुवचनम्

**प्रथमा** भवत् भवती भवन्ति

**द्वितीया** भवत् भवती भवन्ति

**तृतीया** भवता भवद्भ्याम् भवद्भिः

**चतुर्थी** भवते भवद्भ्याम् भवद्भ्यः

**पञ्चमी** भवतः भवद्भ्याम् भवद्भ्यः

**षष्ठी** भवतः भवतोः भवताम्

**सप्तमी** भवति भवतोः भवत्सु

**सम्बोधनम्** हे भवत् हे भवती हे भवन्ति

संज्ञा (इकारान्त-पुंल्लिङ्ग-शब्दः)

मुनि

विभक्तिः एकवचनम् द्विवचनम् बहुवचनम्

**प्रथमा** मुनिः मुनी मुनयः

**द्वितीया** मुनिम् मुनी मुनीन्

**तृतीया** मुनिना मुनिभ्याम् मुनिभिः

**चतुर्थी** मुनये मुनिभ्याम् मुनिभ्यः

**पञ्चमी** मुनेः मुनिभ्याम् मुनिभ्यः

**षष्ठी** मुनेः मुन्योः मुनीनाम्

**सप्तमी** मुनौ मुन्योः मुनिषु

**सम्बोधनम्** हे मुने ! हे मुनी! हे मुनयः!

पति

<u>विभक्तिः एकवचनम् द्विवचनम् बहुवचनम्</u>

**प्रथमा** पतिः पती पतयः

**द्वितीया** पतिम् पती पतीन्

**तृतीया** पत्या पतिभ्याम् पतिभिः

**चतुर्थी** पत्ये पतिभ्याम् पतिभ्यः

**पञ्चमी** पत्युः पतिभ्याम् पतिभ्यः

**षष्ठी** पत्युः पत्योः पतीनाम्

**सप्तमी** पत्यौ पत्योः पतिषु

**सम्बोधनम्** हे पते! हे पती! हे पतयः!

' *<u>पतिशब्दः मुनिशब्दात् किञ्चिद्भिन्नः अस्ति।</u>*

*<u>मुनिशब्दानुसारेण कवि-हरि-कपि-यति-विधि-निधि-वह्नि-व्याधि-भूपति-</u>*

*<u>सेनापतीत्यादीनाम् इकारान्त-पुंल्लिङ्गशब्दानां रूपाणि भवन्ति।</u>*

## उकारान्त-पंुल्लिङ्ग-शब्दः

भानु (सूर्य)

<u>विभक्तिः एकवचनम् द्विवचनम् बहुवचनम्</u>

**प्रथमा** भानुः भानू भानवः

**द्वितीया** भानुम् भानू भानून्

**तृतीया** भानुना भानुभ्याम् भानुभिः

**चतुर्थी** भानवे भानुभ्याम् भानुभ्यः

**पञ्चमी** भानोः भानुभ्याम् भानुभ्यः

**षष्ठी** भानोः भान्वोः भानूनाम्

**सप्तमी** भानौ भान्वोः भानुषु

**सम्बोधनम्** हे भानो! हे भानू! हे भानवः!

*<u>एवमेव विधु-विष्णु-शिशु-वायु-मृत्यु-बाहु-इत्यादीनाम् उकारान्त-पुंल्लिङ्गशब्दानां रूपाणि भवन्ति।</u>*

गुरु

<u>विभक्ति एकवचनम् द्विवचनम् बहुवचनम्</u>

**प्रथमा** गुरुः गुरू गुरवः

**द्वितीया** गुरुम् गुरू गुरून्

**तृतीया** गुरुणा गुरुभ्याम् गुरुभिः

**चतुर्थी** गुरवे गुरुभ्याम् गुरुभ्यः

**पञ्चमी** गुरोः गुरुभ्याम् गुरुभ्यः

**षष्ठी** गुरोः गुर्वोः गुरूणाम्

**सप्तमी** गुरौ गुर्वोः गुरुषु

**सम्बोधनम्** हे गुरो! हे गुरू! हे गुरवः!

*<u>येषु शब्देषु ऋ-र-ष-परतः नकारः दृश्यते तत्र ‘न’ स्थाने ‘ण’ भवति।</u>*

## ऋकारान्त-पुंल्लिङ्ग-शब्दः

### पितृ

विभक्तिः एकवचनम् द्विवचनम् बहुवचनम्

**प्रथमा** पिता पितरौ पितरः

**द्वितीया** पितरम् पितरौ पितॄन्

**तृतीया** पित्रा पितृभ्याम् पितृभिः

**चतुर्थी** पित्रे पितृभ्याम् पितृभ्यः

**पञ्चमी** पितुः पितृभ्याम् पितृभ्यः

**षष्ठी** पितुः पित्रोः पितॄणाम्

**सप्तमी** पितरि पित्रोः पितृषु

**सम्बोधनम्** हे पितः! हे पितरौ! हे पितरः!

*एवमेव, भातृ-जामातृ-देवृ-(देवर)-इत्यादीनाम् ऋकारान्त-पुंल्लिङ्ग शब्दानां रूपाणि भवन्ति।*

## इकारान्त-स्त्रीलिङ्ग-शब्दः

मति

विभक्तिः एकवचनम् द्विवचनम् बहुवचनम्

**प्रथमा** मतिः मती मतयः

**द्वितीया** मतिम् मती मतीः

**तृतीया** मत्या मतिभ्याम् मतिभिः

**चतुर्थी** मत्यै/मतये मतिभ्याम् मतिभ्यः

**पञ्चमी** मत्याः/मतेः मतिभ्याम् मतिभ्यः

**षष्ठी** मत्याः/मतेः मत्योः मतीनाम्

**सप्तमी** मत्याम्/मतौ मत्योः मतिषु

**सम्बोधनम्** हे मते! हे मती! हे मतयः!

**एवमेव गति-भक्ति-रुचि-शान्ति-नीति-जाति-इत्यादीनाम् इकारान्तस्त्रीलिङ्गशब्दानां रूपाणि भवन्ति।**

## ईकारान्त-स्त्रीलिङ्ग-शब्दः

नदी

विभक्तिः एकवचनम् द्विवचनम् बहुवचनम्

**प्रथमा** नदी नद्यौ नद्यः

**द्वितीया** नदीम् नद्यौ नदीः

**तृतीया** नद्या नदीभ्याम् नदीभिः

**चतुर्थी** नद्यै नदीभ्याम् नदीभ्यः

**पञ्चमी** नद्याः नदीभ्याम् नदीभ्यः

**षष्ठी** नद्याः नद्योः नदीनाम्

**सप्तमी** नद्याम् नद्योः नदीषु

**सम्बोधनम्** हे नदि! हे नद्यौ! हे नद्यः!

**एवमेव पार्वती-गौरी-देवी-त्रिलोकी-कौमुदी-इत्यादीनाम् ईकारान्त स्त्रीलिङ्गशब्दानां रूपाणि भवन्ति।**

## उकारान्त-स्त्रीलिङ्ग-शब्दः

धेनु (गाय)

विभक्तिः एकवचनम् द्विवचनम् बहुवचनम्

**प्रथमा** धेनुः धेनू धेनवः

**द्वितीया** धेनुम् धेनू धेनूः

**तृतीया** धेन्वा धेनुभ्याम् धेनुभिः

**चतुर्थी** धेनवे/धेन्वै धेनुभ्याम् धेनुभ्यः

**पञ्चमी** धेनोः/धेन्वोः धेनुभ्याम् धेनुभ्यः

**षष्ठी** धेनोः/धेन्वोः धेन्वोः धेनूनाम्

**सप्तमी** धेनौ/धेन्वाम् धेन्वोः धेनुषु

**सम्बोधनम्** हे धेनो/ हे धेनू! हे धेनवः!

**एवमेव तनु-रज्जु-रेणु-च×चु (चोंच) इत्यादीनाम् उकारान्त-स्त्रीलिङ्गशब्दानां रूपाणि भवन्ति**

## इकारान्त-नपुंसकलिङ्ग-शब्दः

वारि

विभक्तिः एकवचनम् द्विवचनम् बहुवचनम्

**प्रथमा** वारि वारिणी वारीणि

**द्वितीया** वारि वारिणी वारीणि

**तृतीया** वारिणा वारिभ्याम् वारिभिः

**चतुर्थी** वारिणे वारिभ्याम् वारिभ्यः

**प×चमी** वारिणः वारिभ्याम् वारिभ्यः

**षष्ठी** वारिणः वारिणोः वारीणाम्

**सप्तमी** वारिणि वारिणोः वारिषु

**सम्बोधनम्** हे वारि/वारे! हे वारिणी! हे वारीणि!

**एवमेव अस्थि-सक्थि-दधि-अक्षि-इत्यादीनाम् इकारान्त-नपुंसकलिङ्गशब्दानां रूपाणि भवन्ति।**

## उकारान्त-नपुंसकलिङ्गशब्दः

मधु

विभक्तिः एकवचनम् द्विवचनम् बहुवचनम्

**प्रथमा** मधु मधुनी मधूनि

**द्वितीया** मधु मधुनी मधूनि

**तृतीया** मधुना मधुभ्याम् मधुभिः

**चतुर्थी** मधुने मधुभ्याम् मधुभ्यः

**पञ्चमी** मधुनः मधुभ्याम् मधुभ्यः

**षष्ठी** मधुनः मधुनोः मधूनाम्

**सप्तमी** मधुनि मधुनोः मधुषु

**सम्बोधनम** हे मधु/मधो! हे मधुनी! हे मधूनि!

**एवमेव वस्तु-तालु-जानु (घुटना)-दारु (लकड़ी) इत्यादीनाम् उकारान्त-नपुंसकलिङ्गशब्दानां रूपाणि भवन्ति।**

## सर्वनामशब्दाः

**पुंल्लिङ्गम्**

एतत् (यह)

विभक्तिः एकवचनम् द्विवचनम् बहुवचनम्

**प्रथमा** एषः एतौ एते

**द्वितीया** एतम्/एनम् एतौ/एनौ एतान्/एनान्

**तृतीया** एतेन/एनेन एताभ्याम् एतैः

**चतुर्थी** एतस्मै एताभ्याम् एतेभ्यः

**पञ्चमी** एतस्मात् एताभ्याम् एतेभ्यः

**षष्ठी** एतस्य एतयोः/एनयोः एतेषाम्

**सप्तमी** एतस्मिन् एतयोः/एनयोः एतेषु

## स्त्रीलिङ्गम्

एतत् (यह)

विभक्तिः एकवचनम् द्विवचनम् बहुवचनम्

**प्रथमा** एषा एते एताः

**द्वितीया** एताम् एते एताः

**तृतीया** एतया एताभ्याम् एताभिः

**चतुर्थी** एतस्यै एताभ्याम् एताभ्यः

**पञ्चमी** एतस्याः एताभ्याम् एताभ्यः

**षष्ठी** एतस्याः एतयोः एतासाम्

**सप्तमी** एतस्याम् एतयोः एतासु

## <u>नपुंसकलिङ्गम्</u>

एतत् (यह)

विभक्ति एकवचनम् द्विवचनम् बहुवचनम्

**प्रथमा** एतत् एते एतानि

**द्वितीया** एतत्/एनत् एते एतानि

**<u>शेषविभक्तिषु पुंल्लिङ्गवद् रूपाणि भवन्ति।</u>**

**<u>विशेषः</u>-** सर्वनामशब्दानां सम्बोधने रूपाणि न भवन्ति।

## सर्वनाम-शब्दः

**पुंल्लिङ्गम्**

तत् (वह)

विभक्तिः एकवचनम् द्विवचनम् बहुवचनम्

**प्रथमा** सः तौ ते

**द्वितीया** तम् तौ तान्

**तृतीया** तेन ताभ्याम् तैः

**चतुर्थी** तस्मै ताभ्याम् तेभ्यः

**पञ्चमी** तस्मात् ताभ्याम् तेभ्यः

**षष्ठी** तस्य तयोः तेषाम्

**सप्तमी** तस्मिन् तयोः तेषु

## स्त्रीलिङ्गम्

तत् (वह)

विभक्तिः एकवचनम् द्विवचनम् बहुवचनम्

**प्रथमा** सा ते ताः

**द्वितीया** ताम् ते ताः

**तृतीया** तया ताभ्याम् ताभिः

**चतुर्थी** तस्यै ताभ्याम् ताभ्यः

**पञ्चमी** तस्याः ताभ्याम् ताभ्यः

**षष्ठी** तस्याः तयोः तासाम्

**सप्तमी** तस्याम् तयोः तासु

## नपुंसकलिङ्गम्

तत् (वह)

विभक्तिः एकवचनम् द्विवचनम् बहुवचनम्

**प्रथमा** तत् ते तानि

**द्वितीया** तत् ते तानि

**शेषविभक्तिषु पुंल्लिङ्गवद् रूपाणि भवन्ति।**

## सर्वनाम-शब्दः

**पुंल्लिङ्गम्**

यत् (जो)

विभक्तिः एकवचनम् द्विवचनम् बहुवचनम्

**प्रथमा** यः यौ ये

**द्वितीया** यम् यौ यान्

**तृतीया** येन याभ्याम् यैः

**चतुर्थी** यस्मै याभ्याम् येभ्यः

**पञ्चमी** यस्मात् याभ्याम् येभ्यः

**षष्ठी** यस्य ययोः येषाम्

**सप्तमी** यस्मिन् ययोः येषु

## स्त्रीलिङ्गम्

यत् (जो)

विभक्तिः एकवचनम् द्विवचनम् बहुवचनम्

**प्रथमा** या ये याः

**द्वितीया** याम् ये याः

**तृतीया** यया याभ्याम् याभिः

**चतुर्थी** यस्यै याभ्याम् याभ्यः

**पञ्चमी** यस्याः याभ्याम् याभ्यः

**षष्ठी** यस्याः ययोः यासाम्

**सप्तमी** यस्याम् ययोः यासु

## नपुंसकलिङ्गम्

यत् (जो)

विभक्तिः एकवचनम् द्विवचनम् बहुवचनम्

**प्रथमा** यत् ये यानि

**द्वितीया** यत् ये यानि

**शेषविभक्तिषु पुंल्लिङ्गवद् रूपाणि भवन्ति।**

## विशेषण-शब्दः

**पुंल्लिङ्गम्**

महत्

विभक्तिः एकवचनम् द्विवचनम् बहुवचनम्

**प्रथमा** महान् महान्तौ महान्तः

**द्वितीया** महान्तम् महान्तौ महतः

**तृतीया** महता महद्भ्याम् महद्भिः

**चतुर्थी** महते महद्भ्याम् महद्भ्यः

**पञ्चमी** महतः महद्भ्याम् महद्भ्यः

**षष्ठी** महतः महतोः महताम्

**सप्तमी** महति महतोः महत्सु

**सम्बोधन** हे महन्! हे महान्तौ! हे महान्तः!

## स्त्रीलिङ्गम्

महत्

महत्शब्दस्य स्त्रीलिङ्गे 'महती' रूपं भवति, महतीशब्दस्य रूपं नदीशब्दवद् भवति।

**नपुंसकलिङ्गम्**

महत्

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमा** | महत् | महती | महान्ति |
| **द्वितीया** | महत् | महती | महान्ति |

**शेषविभक्तिषु पुंल्लिङ्गवद् रूपाणि भवन्ति।**

## संख्याः

एक

विभक्तिः पुंल्लिङ्गम् स्त्रीलिङ्गम् नपुंसकलिङ्गम्

**प्रथमा** एकः एका एकम्

**द्वितीया** एकम् एकाम् एकम्

**तृतीया** एकेन एकया एकेन

**चतुर्थी** एकस्मै एकस्यै एकस्मै

**पञ्चमी** एकस्मात् एकस्याः एकस्मात्

**षष्ठी** एकस्य एकस्याः एकस्य

**सप्तमी** एकस्मिन् एकस्याम् एकस्मिन्

**एकशब्दस्य रूपं त्रिषु लिङ्गेषु एकवचने एव भवति।**

द्वि

विभक्तिः पुंल्लिङ्गम् स्त्रीलिङ्गम् नपुंसकलिङ्गम्

**प्रथमा** द्वौ द्वे द्वे

**द्वितीया** द्वौ द्वे द्वे

**तृतीया** द्वाभ्याम् द्वाभ्याम् द्वाभ्याम्

**चतुर्थी** द्वाभ्याम् द्वाभ्याम् द्वाभ्याम्

**पञ्चमी** द्वाभ्याम् द्वाभ्याम् द्वाभ्याम्

**षष्ठी** द्वयोः द्वयोः द्वयोः

**सप्तमी** द्वयोः द्वयोः द्वयोः

द्विशब्दस्य रूपं त्रिषु लिङ्गेषु द्विवचने एव भवति। स्त्रीलिङ्गस्य तथा नपुंसकलिङ्गस्य रूपाणि समानानि भवन्ति। त्रि-चतुर्-शब्दयोः रूपाणि त्रिषु लिङ्गेषु केवलं बहुवचने भवन्ति।

त्रि

विभक्तिः पुंल्लिङ्गम् स्त्रीलिङ्गम् नपुंसकलिङ्गम्

**प्रथमा** त्रयः तिस्रः त्रीणि

**द्वितीया** त्रीन् तिस्रः त्रीणि

**तृतीया** त्रिभिः तिसृभिः त्रिभिः

**चतुर्थी** त्रिभ्यः तिसृभ्यः त्रिभ्यः

**पञ्चमी** त्रिभ्यः तिसृभ्यः त्रिभ्यः

**षष्ठी** त्रयाणाम् तिसृणाम् त्रयाणाम्

**सप्तमी** त्रिषु तिसृषु त्रिषु

चतुर्

<u>विभक्तिः पुंल्लिङ्गम् स्त्रीलिङ्गम् नपुंसकलिङ्गम्</u>

**प्रथमा** चत्वारः चतस्रः चत्वारि

**द्वितीया** चतुरः चतस्रः चत्वारि

**तृतीया** चतुर्भिः चतसृभिः (शेषरूपाणि

**चतुर्थी** चतुर्भ्यः चतसृभ्यः पुंल्लिङ्गवद्

**पञ्चमी** चतुर्भ्यः चतसृभ्यः भवन्ति।

**षष्ठी** चतुर्णाम्/चतुर्ण्णाम् चतस¤णाम्

**सप्तमी** चतुर्षु चतसृषु

## कारक तथा विभक्ति-

**क्रियान्वयित्वं कारकत्वम्-** जिन पदों का क्रिया के साथ सीधा सम्बन्ध होता है, उन्हें हम कारक कहते हैं। वह छः प्रकार के होते हैं-

कर्ता कर्म च करणं सम्प्रदानं तथैव च।

अपादानाधिकरणे इत्यादुः कारकाणि षट्।।

कारक विभक्ति विभक्ति-चिह्न

**कर्ता** प्रथमा ने

**कर्म** द्वितीया को

**करण** तृतीया से, द्वारा

**सम्प्रदान** चतुर्थी के लिये

**अपादान** पञ्चमी से (अलग होना)

**सम्बन्ध** षष्ठी का, के, की

**अधिकरण** सप्तमी में, पै, पर

**सम्बोधन** प्रथमा हे! अरे! भो!

**विशेष**- कारकों में सम्बन्ध (षष्ठी विभक्ति) और सम्बोधन (प्रथमा विभक्ति की) की गणना नहीं की जाती है।

## कर्म कारक

कर्तुः ईप्सिततमं कर्म-कर्ता अपनी क्रिया द्वारा जिससे सम्बन्ध करना चाहता है अर्थात् जिसको सबसे अधिक चाहता है, उस कारक की कर्म संज्ञा होती है, जैसे- 'बालकः ग्रामं गच्छति'

इस वाक्य में कर्ता बालक अपनी गमन क्रिया द्वारा गाँव से सम्बन्ध करना चाहता है। अतः गाँव की कर्मसंज्ञा और द्वितीया विभक्ति हो गयी है। इसी तरह राजीवः पुस्तकं पठति, अभिलाषा चित्रं पश्यति।

कर्मणि द्वितीया- कर्म को बताने के लिये द्वितीया विभक्ति होती है, जैसे-

बालकः रसं पिबति।

कुछ द्विकर्मक (दो कर्मवाली) धातुओं के साथ अपादान आदि के स्थान पर द्वितीया विभक्ति होती है, वे धातुएं निम्नलिखित हैं-

दुह्-याच्-पच्-दण्ड्-रुधि-प्रच्छि-चि-ब्रू-शासु-जि-मथ्-मुषाम्।

कर्मयुक् स्याद् अकथितं तथा स्यान्-नी-हृ-कृष्-वहाम्।।

यथा- ऽदीपकः गां दुग्धं दोग्धि। (दीपक गाय से दूध दुहता है)-दुह्

ऽवामनः बलिं वसुधां याचते। (वामन बलि से भूमि माँगता है)-याच्

ऽमाता तण्डुलान् ओदनं पचति। (माता चावल से भात बनाती है)-पच्

ऽन्यायाधीशःअपराधिनं लक्षं दण्डयति। (जज अपराधी को एक लाख का दण्ड देता है।)-दण्ड्

ऽश्यामः गां व्रजम् अवरुणद्धि। (श्याम गाय को ब्रज में रोकता है)-रुध्

ऽअध्यापकः छात्रं प्रश्नं पृच्छति। (अध्यापक छात्र से प्रश्न पूछता है) प्रच्छ्

ऽकृषकः वृक्षं फलानि अवचिनोति। (किसान वृक्ष से फल चुनता है) चिऽगुरुः शिष्यं उपदेशं ब्रूते। (गुरु शिष्य को उपदेश देता है) -ब्रू,

ऽगुरुः शिष्यं धर्मं शास्ति। (गुरु शिष्य को धर्म का अनुशासन करता है) - शास्ऽराहुलः रोहितं शतं जयति। (राहुल रोहित से सौ रुपये जीतता है)-मुष्ऽदेवः क्षीरनिधिं सुधां मथ्नाति। (देवता समुद्र को अमृत के लिए मथते हैं)- मथ्ऽराकेशः हरेशं शतं मुष्णाति। (राकेश हरेश के सौ रुपये चुराता है)-मुष्ऽचारकः अजां ग्रामं नयति, हरति, कर्षति, वहति वा। (चराने वाला बकरी को गाँव ले जाता है, हरता है, खीचता है, ढोता है।)-नी-हृ, कृष्, वह्।

## संख्याएं (मूलरूप)

1. **एक** - एक
2. **दो** - द्वि
3. **तीन** - त्रि
4. **चार** - चतुर्
5. **पाँच** - पञ्चन्
6. **छह** - षट्
7. **सात** - सप्तन्
8. **आठ** - अष्टन्
9. **नौ** 9-नवन्
10. **दस** 1- दशन्
11. **ग्यारह** -एकादशः
12. **बारह** - द्वादशन्
13. **तेरह** - त्रयोदशन्
14. **चौदह** - चतुर्दशन्
15. **पन्द्रह** -पञ्चदशन
16. **सोलह** - षोडश
17. **सत्रह** - सप्तदशन
18. **अट्ठारह** - अष्टादशन्
19. **उन्नीस** - नवदशन्,एकोनविंशति, ऊनविंशति
20. **बीस** - विंशति
21. **इक्कीस** - एकविंशत
22. **बाईस** - द्वाविंशति
23. **तेईस** - त्रयोविंशति
24. **चौबीस** - चतुर्विंशति
25. **पच्चीस** - पञ्चविंशति
26. **छब्बीस** - षड्विंशति

27. **सत्ताईस** - सप्तविंशति
28. **अटठाईस** - अष्टाविंशति
29. **उन्तीस** - नवविंशतिः, एकोनत्रिंशत्, उनत्रिंशत्
30. **तीस** - त्रिंशत्

**अव्ययम्**

अधः (नीचे) वृक्षात् पत्रं अधः पतति।

उपरि (ऊपर) विमानः घनानाम् उपरि गतः।

दूरतः (दूर से) कुमार्गं दूरतः त्यजेत्।

यतः (जहाँ से) यतस्त्वया ज्ञानम् अशेषमाप्तम्।

एकस्मिन् (एक समय में) एकस्मिन् वने सिंहः निवसति स्म।

सम्प्रति (इसी समय, अब) सम्प्रति गृहस्य उपरि मेघः अस्ति।

पुरा (पहले, प्राचीन काल में) पुरा काले एकः नृपः आसीत्।

नाना (विविध प्रकार से) - नाना फलैःफलति कल्पलतेव भूमिः।

खलु (निश्चय ही) - मार्गे पदानि खलु ते विषमी भवन्ति।

किञ्चित (कुछ) किञ्चित् अल्पाहारं ददातु।

समम् (के साथ, मिलकर) - यथा सर्वाणि भूतानि धरा धारयते समम्।

ननु (सन्देहसूचक प्रश्नसूचक, - ननु भवान् अग्रतो मे वर्तते। ननु समाप्तः पाठः तव?

सचमुच, अवश्य ही इत्यादि)

उपसर्ग

## <u>उपसर्गाः क्रियायोगे-</u>

क्रिया के योग में प्र आदि को उपसर्ग कहते हैं, जैसे - प्रहार, प्रगति, प्रकृति, प्रचार, प्रदेश, प्रवाह, प्रभाव आदि प्र उपसर्ग के योग से बने हंै। इसी प्रकार-

**सम्** - संहार, संगति, संस्कृति, सन्देश, सन्धान, संवाद।

**अनु** - अनुहार, अनुगमन, अनुकरण, अनुग्रह, अनुचर अनुभूति, अनुवाद।

**वि** - विहार, विकृति, विदेश, विधान, विभूति, विराम, विवाद।

**अधि** - अधिहरि, अधिकरणम्, अधिष्ठाता, अध्यारोपः।

**उपसर्गों** से धातु के अर्थ बदल जाते हैं।

उपसर्गेण धात्वर्थो बलादन्यत्र नीयते।

प्रहाराहारसंहार विहारपरिहारवत्।।

प्रत्यय

**तव्यत् (तव्य) अनीयर् (अनीय)**

ये दोनों प्रत्यय सकर्मक धातुओं से कर्म अर्थ में तथा अकर्मक धातुओं से भाव अर्थ में होते हैं। इनसे बने शब्दों का प्रयोग क्रिया तथा विशेषण के रूप में होता है।

**उदाहरण** - गम् +तव्यत् (तव्य)

विशेषण रूप में -

गन्तव्यः ग्रामः।

गन्तव्या नगरी।

गन्तव्यं स्थानम्।

**अन्य उदाहरण-**

पठ् +क्त्वा = पठित्वा

पा +क्त्वा = पीत्वा

कृ + क्त्वा = कृत्वा

दृश् + क्त्वा = दृष्ट्वा

**अन्य उदाहरण-** पठ् + तव्यत् = पठितव्यम्

नी+तव्यत्= नेतव्यम्

भुज्+ तव्यत् = भोक्तव्यम्

दा +तव्यत् = दातव्यम्

कृ + तव्यत् = कर्तव्यम्

भू + तव्यत्र भवितव्यम्

**अनीयर्** (**अनीय**) - गम् +अनीयर् = गमनीयम्

विशेषण रूप में = गमनीयः ग्रामः

= गमनीया नगरी

= गमनीयं वनम्

**अन्य उदाहरण-** पठ्+अनीयर् = पठनीयम्

नी + अनीयर् = नयनीयम्

भुज् + अनीयर् = भोजनीयम्

दा+ अनीयर् = दानीयम्

कृ + अनीयर् = करणीयम्

क्त (त) - इस प्रत्यय का प्रयोग भूतकाल के अर्थ मंे किया जाता है, इस प्रत्यय से बने शब्दों का प्रयोग क्रिया तथा विशेषण के रूप में होता है।

क्रिया रूपों मे ंपठ् + क्त = पठितम्

विशेषण रूप मे ं- पठितः ग्रन्थः, पठिता पत्रिका, पठितं पुस्तकम्।

**अन्य उदाहरण** - हस् +क्त = हसितम्

गम् +क्त = गतम्

नी+ क्त = नीतम्

भुज्+ क्त = भुक्तम्

दा + क्त = दत्तम्

कृ +क्त = कृतम्

भू + क्त त्= भूतम्

प्रच्छ् +क्त = पृष्टम्

ग्रह + क्त = गृहीतम्

## धातुरूपाणि

वद्(बोलना)

**लट्लकारः (वर्तमानकाल)**

पुरुषः एकवचनम् द्विवचनम् बहुवचनम्

**प्रथमपुरुषः** वदति वदतः वदन्ति

**मध्यमपुरुषः** वदसि वदथः वदथ

**उत्तमपुरुषः** वदामि वदावः वदामः

**लोट्लकारः (आज्ञा/प्रार्थना)**

पुरुषः एकवचनम् द्विवचनम् बहुवचनम्

**प्रथमपुरुषः** वदतु/वदतात् वदताम् वदन्तु

**मध्यमपुरुषः** वद/वदतात् वदतम् वदत

**उत्तमपुरुषः** वदानि वदाव वदाम

**लङ्लकारः(भूतकाल)**

**प्रथमपुरुषः** अवदत् अवदताम् अवदन्

**मध्यमपुरुषः** अवदः अवदतम् अवदत

**उत्तमपुरुषः** अवदम् अवदाव अवदाम

**विधिलिङ्लकारः (विधि/सम्भावना)**

**प्रथमपुरुषः** वदेत् वदेताम् वदेयुः

**मध्यमपुरुषः** वदेः वदेतम् वदेत

**उत्तमपुरुषः** वदेयम् वदेव वदेम

**लृट्लकारः (भविष्यत्काल)**

**प्रथमपुरुषः** वदिष्यति वदिष्यतः वदिष्यन्ति

**मध्यमपुरुषः** वदिष्यसि वदिष्यथः वदिष्यथ

**उत्तमपुरुषः** वदिष्यामि वदिष्यावः वदिष्यामः

*एवमेव खेल्-खाद्-धाव्-रस्-पूज्-कूर्द्-हस्-पत्-भ्रम्- लिख्-गम् (गच्छ), चर्-पठ्-क्रीड्-इत्यादीनां धातूनां रूपाणि भवन्ति।*

वस् (रहना/ठहरना)

## लट्लकारः (वर्तमानकाल)

पुरुषः एकवचनम् द्विवचनम् बहुवचनम्

**प्रथमपुरुषः** वसति वसतः वसन्ति

**मध्यमपुरुषः** वससि वसथः वसथ

**उत्तमपुरुषः** वसामि वसावः वसामः

## लोट्लकारः (आज्ञा/प्रार्थना)

**प्रथमपुरुषः** वसतु/वसतात् वसताम् वसन्तु

**मध्यमपुरुषः** वस/वसतात् वसतम् वसत

**उत्तमपुरुषः** वसानि वसाव वसाम

## लङ्.लकारः (भूतकाल)

**प्रथमपुरुषः** अवसत् अवसताम् अवसन्

**मध्यमपुरुषः** अवसः अवसतम् अवसत

**उत्तमपुरुषः** अवसम् अवसाव अवसाम

## विधिलिङ्लकारः (विधि/सम्भावना)

**प्रथमपुरुषः** वसेत् वसेताम् वसेयुः

**मध्यमपुरुषः** वसेः वसेतम् वसेत

**उत्तमपुरुषः** वसेयम् वसेव वसेम

## लृट्लकारः (भविष्यत्काल)

**प्रथमपुरुषः** वत्स्यति वत्स्यतः वत्स्यन्ति

**मध्यमपुरुषः** वत्स्यसि वत्स्यथः वत्स्यथ

**उत्तमपुरुषः** वत्स्यामि वत्स्यावः वत्स्यामः

दा (देना)

## लट्लकारः (वर्तमानकाल)

पुरुषः एकवचनम् द्विवचनम् बहुवचनम्

**प्रथमपुरुषः** ददाति दत्तः ददति

**मध्यमपुरुषः** ददासि दत्थः दत्थ

**उत्तमपुरुषः** ददामि दद्वः दद्मः

## लोट्लकारः (आज्ञा/प्रार्थना)

**प्रथमपुरुषः** ददातु/दत्तात् दत्ताम् ददतु

**मध्यमपुरुषः** देहि/दत्तात् दत्तम् दत्त

**उत्तमपुरुषः** ददानि ददाव ददाम

## लङ्लकारः (भूतकाल)

**प्रथमपुरुषः** अददात् अदत्ताम् अददुः

**मध्यमपुरुषः** अददाः अदत्तम् अदत्त

**उत्तमपुरुषः** अददाम् अदद्व अदद्म

## विधिलिङ् (विधि/सम्भावना)

**प्रथमपुरुषः** दद्यात् दद्याताम् दद्युः

**मध्यमपुरुषः** दद्याः दद्यातम् दद्यात

**उत्तमपुरुषः** दद्याम् दद्याव द्दयाम

## लृट्लकारः (भविष्यत्काल)

**प्रथमपुरुषः** दास्यति दास्यतः दास्यन्ति

**मध्यमपुरुषः** दास्यसि दास्यथः दास्यथ

**उत्तमपुरुषः** दास्यामि दास्यावः दास्यामः

कथ् (कहना)

## लट्लकारः (वर्तमानकालं)

पुरुषः एकवचनम् द्विवचनम् बहुवचनम्

**प्रथमपुरुषः** कथयति कथयतः कथयन्ति

**मध्यमपुरुषः** कथयसि कथयथः कथयथ

**उत्तमपुरुषः** कथयामि कथयावः कथयामः

## लोट् लकारः (आज्ञा/प्रार्थना)

**प्रथमपुरुषः** कथयतु/कथयतात् कथयताम् कथयन्तु

**मध्यमपुरुषः** कथय/कथयतात् कथयतम् कथयत

**उत्तमपुरुषः** कथयानि कथयाव कथयाम

## लङ्लकारः (भूतकाल)

**प्रथमपुरुषः** अकथयत् अकथयताम् अकथयन्

**मध्यमपुरुषः** अकथयः अकथयतम् अकथयत

उत्तमपुरुषः अकथयम् अकथयाव अकथयाम

## विधिलिङ्लकारः (विधि/सम्भावना)

**प्रथमपुरुषः** कथयेत् कथयेताम् कथयेयुः

**मध्यमपुरुषः** कथयेः कथयेतम् कथयेत

**उत्तमपुरुषः** कथयेयम् कथयेव कथयेम

## लृट्लकारः (भविष्यत्काल)

**प्रथमपुरुषः** कथयिष्यति कथयिष्यतः कथयिष्यन्ति

**मध्यमपुरुषः** कथयिष्यसि कथयिष्यथः कथयिष्यथ

**उत्तमपुरुषः** कथयिष्यामि कथयिष्यावः कथयिष्याम

**निर्देशन** –

- श्री संजय सिन्हा, निदेशक, राज्य शैक्षिक अनुसन्धान एवं प्रशिक्षण परिषद्, उ.प्र.
- श्री अजय कुमार सिंह ,संयुक्त निदेशक, राज्य शैक्षिक अनुसन्धान एवं प्रशिक्षण परिषद्, उ.प्र.

**e-book विकास ---**

- अल्पा निगम(प्र.अ.) ,प्राथमिक विद्यालय तिलौली, गोरखपुर
- अमित शर्मा(स.अ),उच्च प्राथमिक विद्यालय महतवानी, उन्नाव
- अनीता विश्वकर्मा(स.अ), प्राथमिक विद्यालय सैदपुर पीलीभीत
- अनुभव यादव(स.अ), प्राथमिक विद्यालय गुलरिया उन्नाव
- अनुपम चौधरी (स.अ),प्राथमिक विद्यालय नौरंगाबाद बदायूं
- आशुतोष आनंद (स.अ),उच्च प्राथमिक विद्यालय मियाँगंज बाराबंकी
- दीपक कुशवाहा (स.अ),उच्च प्राथमिक विद्यालय गजफ्फरनगर, उन्नाव
- फिरोज खान (स.अ),प्राथमिक विद्यालय चिड़ावक, बुलंदशहर
- गौरव सिंह (स.अ),उच्च प्राथमिक विद्यालय फतेहपुर मठिया, फतेहपुर
- हृतिक वर्मा (स.अ),प्राथमिक विद्यालय संग्राम खेड़ा ,उन्नाव
- नितिन कुमार पाण्डेय (स.अ),प्राथमिक विद्यालय मध्यनगर ,श्रावस्ती
- मनीष प्रताप सिंह (स.अ),प्राथमिक विद्यालय प्रेम नगर, फतेहपुर
- प्राणेश भूषण मिश्र (स.अ),पूर्व माध्यमिक विद्यालय पठा, ललितपुर
- प्रशांत चौधरी (स.अ),प्राथमिक विद्यालय रवाना, बिजनौर
- राजीव कुमार साहू (स.अ),उच्च प्राथमिक विद्यालय ,सराय गोकुल सुल्तानपुर
- शशि कुमार(स.अ), प्राथमिक विद्यालय खेड़ा, लच्छीखेड़ा,अकोहरी उन्नाव
- शिवाली गुप्ता (स.अ),पूर्व माध्यमिक विद्यालय धौलरी,मेरठ
- वरुणेश मिश्रा (स.अ),प्राथमिक विद्यालय मदनपुर पनियार ,सुल्तानपुर